सिद्धिवैतथ्यम्

वेदान्ताचार्य —

श्रीस्वामिरामप्रपन्नाचार्येण

विरचितम्

२०३२ वै०

सिद्धिवैतथ्यम्

वेदान्ताचार्यश्री १०८ स्वामिप्रपन्नाचार्यविरचितम्



प्रकाशक
श्रीस्वामिप्रपन्नाचार्यः
वाराणसी

मुद्रक
पर्वतीय मुद्रणालय
के० २२।३६ पंचगंगा घाट,
वाराणसी

[सर्वेऽधिकाराः रचयितुः स्वायत्तीकृताः]

प्रथमं संस्करणम् २०३२ वि०

मूल्यम्–२.५०

प्राप्तिस्थानम्—

(१) आचार्य पूर्णचन्द्र डुङ्गेलः
प्राचार्य–ला०म०सं० महाविद्यालय
प्राचीन अवधूत मण्डलाश्रम
पो० गुरुकुल कांगड़ी (हरिद्वार)

सिद्धिर्वैतथ्ये विदुषां सम्मतयः

अनन्तश्रीविभूषित म० म० व्याकरणवेदान्ताद्यनेकागमपारावारिणामाचार्य-

श्रीपूज्यस्वामिवासुदेवानन्दमहाभागानामाशीर्वचांसि

आलोक्य सिद्धिर्वैतथ्यं वै तथ्यं भात्रि भास्वतम्।
पाण्डित्यपूर्णशेमुष्या रचितं चित्रमद्भुतम् ॥१॥

रामानुजाभिधे धीरः सम्प्रदाये प्रदीक्षितः।
बाल्यादेव सुसाधुत्वे सुयुक्तः साधुताङ्कितः ॥२॥

अलङ्कृतमलङ्कारैर्भावगाम्भीर्यभावितम्।
विपश्चितां विनोदाय पाण्डित्यपालनाय वै ॥३॥

दुर्दान्तानां निग्रहाय शान्तानां तोषणाय च।
पदलालित्यसंयुक्तं भूषितं स्वात्मविद्यया ॥४॥

रचना रक्षणं कुर्याद्वासुदेवः स्वयं प्रभुः।
प्रसिद्धिं सिद्धिर्वैतथ्यं प्राप्नोतु तदनुग्रहात् ॥५॥

निजान्तेवासिनो वीक्ष्याऽलौकिकीमुन्नतिं हठात्।
हृष्टो वाञ्छामि चायुष्यं प्रपन्नस्यास्य धीमतः ॥६॥

प्रपन्नाचार्य आचार्यो वेदान्तस्येतरस्य च।
यशस्वी वेदवेदाङ्गतत्त्वे भूयान्मदाशिषा ॥७॥

आचार्यः स्वामिवासुदेवानन्दः
कृष्णकुञ्ज-पुष्कर
जि० अजमेर (राजस्थान)

गृहिकुलभूषण-महामहोपाध्याय-श्रीछज्जूराम-विद्या सागरमहाभागानां सम्मतिः

श्रीश्रद्धेयस्वामिपादानां पुस्तकमिदं मया सम्यगवलोकितम्
स्वविषयप्रतिपादने नितान्तमुपयोगमर्हतीत्यहं मन्ये ।।

म० म० छज्जूराम विद्यासागरः

लालकिला दिल्ली

व्या० न्या० सां० साख्ययो० पुराणेति० ज्योतिषाचार्य

आचार्यपूर्णचन्द्रोपाध्यायस्य

(प्रधानाचार्य—श्रीभगवान्दास संस्कृत महाविद्यालय)
प्रा० अ० मण्डलाश्रम, काँगड़ी ज्वालापुर (हरिद्वार) स्थस्य—

श्रीमच्चन्द्रशेखरः शरणम्

बिल्वादिभिः प्रतिदिनं सनुतिं सपर्यां
कर्तारमाशु विदधाति रमापतिं यः ।।
विश्वार्णवस्य च तितीर्षुजनैकधामा
गौरीपतिर्भवतु शङ्कर आश्रयोऽसौ ।।१।।

सुतरामवगच्छन्त्येव ते विद्याविद्योतितान्तःकरणा इदं यदत्र लोके जन्मजन्मान्तरीयनानाविधवासनावासितस्वान्ताः स्वाभाविका-संभावनाविपरीतभावनापारोच्यात्मकत्रिविधदोषदग्धाः प्राणिनोऽ-पारेऽगाधे चात्र भवार्णवे निमज्जन्त्युन्मज्जन्ति चेति ।

मोक्षाख्ये परमपुरुषार्थे स्वप्नेऽप्यदत्तचित्तानां पशुप्रायाणाम् 'जायस्वम्रियस्वे'त्येतन्न्यायेन तृतीयस्थानभाजां जीवानां तिष्ठतु कथा ।

विचारघना बुद्धिमन्तोऽपि तत्तच्छास्त्रार्णवपारीणा भूमण्डल-तिलकायमानायां प्राच्यावाच्यसमस्तज्ञानविज्ञाननिधौ श्रीमदत्रभवत्यां समस्तविश्वसंस्कृतिमूलभूमौ भारतभूमौ निवसन्तोऽपि विश्वगुरुत्वे

वोढव्यैऽपि विपरीतभावनाभावितात्मानो विमूढा इवौदार्यं सहानुभूति-सहास्तित्वभावनां परस्परसहयोगञ्च न कृत्वाऽन्योन्यमेव स्वाङ्ग-मुपहसन्ति। तेषामियं प्रवृत्तिस्तानेव मूर्खयितुमलम्।

विपरीतभावनापिशाचिनीमुक्तकल्पा अपि केचन विबुधवर्याः पारोक्ष्यदोषदूषितहृदयाः सन्तः पथिभ्रष्टकल्पा एव अस्थानेऽपि दोष-दर्शनैकशीलवत्त्वात्। अस्तु, हिंसकाः सन्तीति शालयो नोप्यन्त इति कः कथयेदेवं चेत्संसारोऽयं निरन्न एव स्यान्नतु तथा। प्रकृतेऽपि दूषकाः सन्तीति ग्रन्था न लिख्यन्त इति न। निःसङ्कोचं लिख्यन्त एवेति निश्चप्रचमेव समेषाम्।

आजोवनममरवाणीविश्वसंस्कृतिमूलार्यसंस्कृतिसमुपासनमहा-व्रतानां वेदव्याकरणवेदान्तन्यायायुर्वेदसङ्गीताद्यनेकशास्त्रपरिशीलन-शुद्धान्तःकरणानां निर्मलमनसां तत्तच्छास्त्रमर्मज्ञानां शास्त्रार्थमहा-रथिनां व्याख्यान-प्रवचनकलापटूनां जगद्गुरु श्रीमद्रामानुजाचार्य-सम्प्रदायप्रवर्द्धकानां श्रीमतां परमश्रद्धेयश्रीप्रपन्नाचार्यस्वामिवर्याणा-मयं 'सिद्धिवैतथ्य'नामाकारेण स्वल्पोऽपि अमूल्यविचारपूर्णो महा-शयो ग्रन्थो मया व्यलोकि समानन्दि च। ग्रन्थोऽयं विचारशीलानां जगत्सूक्ष्मतत्त्वबुभुत्सूनां सदैव महत उपकाराय स्यादित्यहं मन्ये। आशासे चेदमेवेमे स्वामिवर्या उत्तरोत्तरमग्रेऽपि स्वीयानमूल्याननुभवा-ननेनैव प्रकारेणोट्टङ्कयिष्यन्ति प्राकाश्यमानेष्यन्तीति शम्।

महाशिवरात्रिः २०३१ **आचार्यः पूर्णचन्द्रोपाध्यायः**

सिद्धिवैतथ्यविषयानुक्रमणिका

पातनिका	
मापनुतिः	१
वादीभभीकरविशयः	१
अनध्यक्षे नानुमित्सा	३
मापकशतैरमाप्यं तत्त्वम्	५
भिन्नसत्त्वदुर्ब्यसनशकलनम्	६
अनभिहितप्रतिवचनविप्रलम्भनम्	८
इन्द्रियत्वधातुत्वयोर्वाचकभिन्नत्वेऽपि वाच्यमेकम्	१०
चिद्दुर्लक्षणयोर्निरुक्तिरशक्या	१३
भूतसम्विद्भूतत्ववादः न सञ्जयः	१८
भिन्नाप्रायम्यत्वासम्भवेऽभिन्नत्वासम्भवः	२३
स्वापसत्त्ववैतथ्यम	२४

———

अमिते विदुषे निवृतमुपायनी क्रियते ।
लेखकः २८।७५

पातनिका

विदाङ्कुर्वन्तु सारासारसुधावधीरिणि विलासपाटूपटकाश्यपिपूताः चित्रगवीकाः निरर्गले शकलिते जगतीतले प्रवसतामागमजङ्गमाचलाधिष्ठानभूतश्चिद्विलासब्रह्मेति मानमेयबलाबलपूर्वकं स्वस्वसमयानुगुण्यमविधित्सन्तिसंख्यावन्तस्सन्तः तेष्वषि भिन्नमेव सत्यञ्जगत्तत्त्वतोऽपरं भिन्नाभिन्नच्छुद्धाभिन्नाचिन्त्यभिन्नाभिन्नप्रकारप्रकारीभावत्वावच्छिन्न वस्तुतत्त्वमिति । तत्र कस्य समीचीनं कस्य वासमीचीनदूषणभूषणपरमिति विविदिषमाणास्तत्त्वबुभुत्सवस्सन्ति, कतिचनाभिन्नसत्त्वन्नान्यदिति, कस्य किमभ्युपगन्तव्यं तथागताशाम्बरलौकायतिकाः स्वस्वसमयप्रतिपादनपराः न कातरा अत एव परसमयमानविमानीकुर्वन्तः प्रत्यवतिष्ठन्ते निलिम्पदेशिकसमयिकाः साम्प्रतिकाः मेदिनीमभिव्याप्याभिवर्तन्ते नहि तानुद्दिश्य नास्तिकास्तिकन्यायान्यायपरिभाषां भाषितुं शक्ताः विपश्चिमाः भिन्नक्रमप्रक्रान्तत्वात् । अस्यामवस्थायां किमुद्दिश्य किं विधेयमिति संसृतितले बम्भ्रम्यमाणसूरिकुलमूलाशक्यं, नह्येकत्र विदुषि सर्वविषयप्रत्ययसम्भावनायांक्लिङिति, सम्भाव्यमानविषयविशयत्वात् । गुरुकल्पायमाणलौकिकधीत्वस्यापि सर्वदैव सर्वविषयेषु कुण्ठाप्रहारात्किमुतस्सहचारव्यभिचारसञ्चारिभावानां नव्यभव्यावधीरितानामिति ।

प्रमेयकमलदिवाकराणां सविधे प्रस्तूयमान सिद्धिवैतथ्य'मिदमावेदनपरमवतरति किलाभिन्नभिन्नविशिष्टच्छुद्धाभिन्नाचिन्त्यभिन्नाभिन्नाभिन्नाभिन्नजिनजिनप्रतिलब्धकीर्तिकल्पतीर्थसमयसारासारीभूतसिद्धित्रयावच्छिन्नोपाधित्वानवच्छिन्नच्छुद्धभूतस्य स्थैर्यमिति। ज्ञानमिथ्यात्वं निश्चयमिथ्यात्वं वा सञ्ज्ञीकरणमस्तिभातिप्रियनामरूपाणां वस्तुतः शास्त्रियाशास्त्रियद्वित्वमपि वितथमवगाहत इति द्वित्वावच्छिन्नद्वित्वमात्रनिषेधप्रतियोगित्वाद्विलक्षणानुभव इति प्रस्तूयमानलघुप्रबन्धकल्पान्वयकरणन्निर्मत्सरवदान्यकल्पप्रेक्षावद्दर्शनपथमधिरोहतीति। भिन्नवादीभभीकरपञ्चावयववाक्यघटितन्यायामृतकर्कशतर्कताण्डवपराकरणचतुरप्रमेयकमलदिवाकरमधुसूदनसारस्वतसार्वभौमप्रबन्धिततत्पूर्वकत्वसत्त्वन्नवेति प्रवृत्तेयं शेमुषी। समुज्ज्वलदर्शनदशान्न तिरोहितं खलु परिमितकलेवरप्रबन्धप्रबन्धितेन कतिचन प्रासादमाधुर्यगुणावलम्बनाः शेमुषीकाः दर्शनपथिकायिष्यन्ति तत्रौजायिष्यन्तो भूयांसः कटाक्षभीमायिताः स्फुटास्यव्यापारेण कतिचनोपांशुनां वाव्रज्यमानाः सजातीयविजातीयस्वगतभिन्नेषु पाञ्चावयविकच्छाब्दिकलाक्षणिकपारिभाषिकनिबन्धितौत्सर्गिकान्विश्वान्दोषानध्यक्षानध्यक्षानुद्भावयिष्यन्ति कतिचन किं व्यापारीकृतं न किमपीति। 'सत्यानृतेमिथुनीकृते' ऽनृतबाहुलकत्वन्निश्चप्रचमेव, तत्रापि न तथ्यपथे, मदाघूर्णितविशयविषयीकरणे नव्यभव्यसृतिपथिकायमानाः किल्लाक्षणिकाः विप्रतिपत्स्यन्ते किलावच्छेदकावच्छिन्नतन्निष्ठप्रकारतानिरूपिताधिकरणतानुयोगिताप्रतियोगिताकप्रभूत्तयोऽस्मत्कुलधर्म इति, परं देशिकाभ्यासवरीवस्यकृतभूरिश्रमवतां युक्तमिति परिमितं छिन्नं निर्मत्सरवतां न्यायदर्शनपथे सुकुमारपदावलीललिते स्वान्ते कान्ते मत्सरायमाणभावाः शब्दा वाजस्रं प्रौढतरन्यायपथप्रवर्तमानानामपि

चिखेदयिष्यन्ति,तीर्थान्तरविदिताम्बराणामपि विधिरयं स्वतःप्रवृत्तः। सकलपुरुषार्थपरिज्ञानोपायभूतप्रमेयसंग्रहस्याप्रयोजनानर्थक्यञ्चाभिवदतां मुखरिमानसे प्रमेयवस्तुतत्त्वं ध्रुवितम्। साध्यसत्त्वसिद्धित्रयत्वापन्नविश्वागमानामानृत्योपपत्त्यर्थं समे प्रमेयाः प्रवृत्ताः। अवास्तवप्रमेयाः कथं प्रवर्तन्त इति 'यया यया पुंसां व्युत्पत्तिसिद्धये भवति सैव प्रक्रियाधिकारिभेदेन निभालनीयेति। अन्यथा घटशब्दोच्चारणमात्रेण कम्बुग्रीवादिमतो व्यक्तेर्भानविरहाद्वाच्यवाचकशब्दानृत्यप्रसङ्गात्केवलानुभवमात्रस्वरूपत्वान्न प्रस्तारक्रमः।

बुधवरवशम्बदः
स्वामिप्रपन्नाचार्यो वेदान्ताचार्यः

सिद्धिवैतथ्यम्

मापनुतिः

सकलविपद्धरणकरणजगदक्षमः
प्रतिपलशरभविभवेक्षणक्षमः ।
विजयति भवजननादरमात्रान्वितः
मापविदग्धतलस्पर्शनसोमः ॥१॥

वादीभभीकरविशयः

अथागमजङ्गमाचलन्यायसिद्धाञ्जनकृतकत्वसत्त्वाक्षमवादीभकालाक्षेपस्तदभिसन्धिपूर्वकनाकीगिर्विलासव्याजीकृत्य निखिलतीर्थसमयानभिज्ञपशुचोदितद्वापरकुलप्रतिवचनं रामः, विशयव्याप्यधर्मान्तरघटितव्यापकारोपमूलकतर्कपूर्वत्वाध्यक्षीभूतानुमित्सानानुमित्सितप्रतिपन्नप्रत्ययः, सम्प्रतिपन्नसम्प्रसादविप्रतिपन्नसिद्धित्रयावच्छिन्नविष्टपास्यव्यापारच्छद्मवर्जितच्छुत्यमूलकत्वान्नस्सिद्धिर्न तथागतमूलकं, सिद्धित्रयार्थपञ्चकव्यासज्यवृत्तिधर्माविच्छिन्नभिन्नविष्टपत्रिकालाबाध्यत्वन्न वादीभकठिनीपशुचोदितमतिचोद्यं प्रतिचोद्ये परसमयोररीकरणमेव तथ्यमिति नायं वादीभवापनियमः । सकलनिगमागमसमधिगम्येश्वरविषये करालकलिकालव्यालाशितान्तः-

करणानामन्तःकरणे समुदेति काचिद्विप्रतिपत्तिः। साकल्यतीर्थकालविदितान्तःकरणानामेकस्मिन्धर्मिणि नानाधर्मविगाहीत्यन्यतरपक्षः समीचीनः। यस्यां विप्रतिपत्तौ सम्विदि भासमानत्वं विरज्यते तत्र धर्मधर्मिभावयोः नित्यशुद्धबुद्धमुक्तस्वभावे वादीभवरेन्यूनीकर्तुमशक्यत्वात्परावरानवच्छिन्ने निर्धर्मके ब्रह्मणि सत्यत्वाद्यवच्छिन्नधर्मस्य कथङ्कारमनुश्रववचनं मापकत्वेनाभ्युपगच्छन्ति। त्रिकालाबाध्यत्वस्य मानमानीकर्तुमयुक्तमेवेति दुर्वैतण्डिकप्रेक्षावत्प्रवृत्तिः सिद्धिवैखरीमुरीक्रियमाणेऽद्वयगहनकण्ठीरवायमाणानां कालः कालात्ययापदिष्टः। कालात्ययापदिष्टतीर्थसमयासमये परकालसमयः प्रवेशः, परकालपरकालपालकेलित्वेनापाकरणे सिद्धित्वासत्वमभ्युपेयं विकलम्। ज्ञप्तिगताध्यक्षविषयेऽस्मिन्नध्यूह्यभिन्नवैतथ्यप्रतिपाद्यमाणेऽभिन्नवैतथ्यं सुतरां दुर्वारं, तथा च यत्र भिन्नवैतथ्यं तत्राभिन्नवैतथ्यमलीकायितुमैलविलप्रचुरद्रविणोत्कोचेनापि प्रत्ययसामान्यम्। भिन्नवैतथ्यसिद्धित्वावच्छिन्नं प्रत्यभिन्नवैतथ्यावच्छिन्नमेव निदानमिति निदानीक्रियमाणेऽभिन्नसिद्धिसत्त्वे भिन्नवैतथ्यं केनापि मालालेन संख्यावता संख्यापयितुं दुर्गतमेव। भिन्नाभिन्नसाधनवाधनमापकशतप्रयोगेणोभयतःपाशारज्जुरितिसमवगन्तव्यम्। भिन्नपूर्वकत्वानभ्युपगमेऽभिन्ना निष्पत्तिः भिन्नाभिन्नयोः कृत्यनिदानभावाभ्युपगमवादे निदानवैतथ्ये कृत्यवैतथ्यमभ्युपगन्तव्यमभ्युपगमे च निर्विशेषसमयः जहतीभवति। जगतोनकर इव सात्वतसमयश्चकास्तीति चेद्वादकिङ्किलपङ्किलानवच्छिन्नत्वात्परकालोऽपि स्वसमयबाल एव वादावादसमधिगतलोकोत्तरवैदग्ध्यविरहात्। न च निर्विशेषाद्वयसमयमानमुरीकृतमर्थक्रियाकारितायामिति चेत्तन्नयुक्तं लोकोत्तरविदग्धभावसमाकलितान्तःकरणे व्यवहारनिरुक्तिरवचनीयैव, शब्दप्रयोगत्वमितिचेदुन्मत्तकल्पे प्रसक्तत्वादलक्षणमेव। एवञ्च वादीभाः मापकशतैरपि सिषाधयितुं साध्यं न प्रभवन्ति सन्तं, त्रैकालिकसंसर्गविच्छिन्नप्रतियोगिताकाभाव इति चेत्--'यावज्जीवमहं मौनिवत्'

प्रतिफलीभवति श्रीमति वादीभे। प्रतिवादीभभयङ्करप्रतिचोद्यमपि कल्पितमेव शब्दविषयत्वात्, स्वाभाववति प्रतीयमानस्य कल्पितत्वमभ्युपगमात् क्रियासमभिव्याहारस्यापि परीक्षिताध्यक्षाभावः। तथा च—भिन्नं वितथं दृश्यत्वादित्यनुमानेऽनुमानमेवायुक्तम्। परीक्षिताध्यक्षसम्विदन्तरानुमानासम्भवादनुमानप्रसंगस्याप्रयोजकत्वात्। संपरीक्षिताध्यक्षज्ञप्तौ सत्यां पर्वतो वह्निमानिति व्याप्तिज्ञप्तिः। समध्यक्षसम्प्रयोगनिदानपूर्वकमेवानुमानं वैखरीविषयीभवितुं युक्तम्।

अनध्यक्षे नानुमित्सा

अनध्यक्षेऽपि व्याप्तिज्ञानं युक्तमिति गहनप्रलापे 'पर्वतो वह्निमा' नित्यत्रापि पक्षतावच्छेदकावच्छिन्ने विद्यमानसाध्यतावच्छेदकावच्छिन्नं सहजानध्यक्षत्वेनैव सिद्धिः सम्भवेन्न तथाभ्युपगमः किंल्लाक्षणिकानाम्। सहजानध्यक्षत्वे किंल्लाक्षणिकवापोऽपि विधुर एव न प्रकरणसमः किन्नाम निर्विशेषाद्वयगहनगहनवादीभवराणाम्। किंल्लाक्षणिकसमये साधनतावच्छेदकावच्छिन्नानध्यक्षे साध्यतावच्छेदकावच्छिन्नसिद्धिरसिद्धा तथैव भिन्नविष्टपवैतथ्यमपि क्वचिद्विष्टपांतरप्रसिद्धिः स्यात्तदानुमानं प्रसरति नान्यथा'स्यादुन्मत्तकल्पप्रलापः। रसवत्यां सहजाध्यक्षत्वात्पक्षनिष्ठोद्देश्यतानिरूपित साध्यनिष्ठ विधेयताकबोधानविल एव केवलाद्वयवादिकाले शाब्दबोधमूलवाटाभावात् कृत्स्नतीर्थानाकलितपरसमयेऽनुश्रववचनमानं कस्मिन्नुपयुज्यते ! सति वासति नाद्यपक्षः क्षोदक्षमः निष्प्रयोजनकरटदशनपरीक्षणवदनन्तरपक्षस्तु स्वान्त्यवसत्समज्याश्रावणाध्यक्षविषयो न तु वादिवैभवपराभवप्रेक्षावत्कुले। वितथमिदमित्युक्तौ त्रिकालाबाध्यं मापकं प्रयोक्तव्यम्। सन्मापकैरसत्साधनमनवस्थावर्तपतनं स्यात् परिदृश्यमानप्रपञ्चवैतथ्यसाधनबाधनतन्त्राणामैदम्पर्यतात्पर्यानवबोधनात्। को हि सकलतीर्थसारासारविवेचनधुरन्धरशक्रतनयः सतासत्कालयेत्। अखिलागमैदम्पर्यज्ञानत्वावच्छिन्नसंख्यावद्वचनप्रामाण्या-

भ्युपगच्छाम इति वचोऽपि शकलितमेव सकलविषयविशयीकरणप्रकारविबोधयिषयैदम्पर्यतात्पर्यावधारणधुरन्धरशेमुषीके सति मानमेयभावो दुरन्तरः । चिति साधने प्रपञ्चितसकलतन्त्रमानव्यवहारासाधारणद्वारमित्यपि स्वान्तेवसद्दृशि धूलिप्रक्षेपः । स्वतः सिद्धे निर्विशेषे चिति तन्त्रमानव्यवहारसाध्यमिति मा चोद्यतां प्रपञ्चकुक्षिनिक्षिप्ततन्त्रमानव्यवहारस्यापरमार्थिकत्वात् 'कम्बलेकतिरोमाणी' तिवत्स्यात् । सिद्धसिद्धिसन्निपातवैखरीति मा भैषीः, मानाधीनमेयसिद्धिरितिचेन्माने किं मानमनवस्थितिकान्तारपथिकायन्ते वादरसिकाः ।

सिद्धिकारानुमितपूर्वकत्वशब्दप्रयोगावसरे 'पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन' इत्यनुमानद्वितयानुमानितं दृष्टिसृष्टिकालावच्छिन्नमितिस्थैर्यम् । तद्धर्मसम्बन्धदेशकालावच्छिन्नाधेयतानिरूपिताधिकरणता यत्र तत्रैव तद्धर्मसम्बन्धदेशकालावच्छिन्नात्यन्ताभावत्वं स्वस्य वैतथ्यम् । निर्विशेषचित्सम्वित्कालेऽध्यक्षातिरिक्तमनभ्युपगमात्तदभावे व्याप्तिज्ञानासम्भवाच्च । इदन्त्वावच्छिन्नाहन्त्वावच्छिन्नव्यक्तिविषययोरभिन्नवादिसमयेऽनुपपन्नम् इदमे दीयतामहमेदीयतामिति नाभ्युपगम्यते ? इदन्त्वाहन्त्वयोर्थक्रियाकारित्वानङ्गीकर्तृकाले स्वसमयसन्तानवितानानलीक्रियमाणे चित्त्वधर्मावच्छिन्नं क्लीवलिङ्गमवशिष्टम् । तच्च निर्धर्मकत्वाज्जगदुद्भवस्थितिलयनिदानं क्लीवे समापतिते क्लीवस्योद्भवस्थितिलयनिदानं प्रतिपादयता तथागतशुन्यमिव, गाण्डवकलापाटवदर्शने कोलकलाविजयवदेव स्यात् । तैत्तिरीयमन्त्रानुवादजन्माद्यस्येति पाराशर्यसूत्रोऽयं मापकत्वेन न प्रसरति निर्धूतनिर्विशेषाभिन्नग्रहने । अन्तःकरणावच्छिन्नचैतन्येऽन्तःकरणसत्त्वाच्चित्यन्तःकरणाभावात्प्रस्तूयमानजिज्ञासाधिकरणासम्भवः । जिज्ञास्यमन्तरा जिज्ञासाधिकरणप्रकरणाप्रकरणं सुवचं सुगततीर्थसमयगतिरपि

दुर्गता। शुन्यशेषसत्वे नान्यत्किञ्चिदाभाति, शुन्यस्याप्यधिष्ठानमन्तरा शुन्यमित्याकारकज्ञप्त्यभावात्। स्वसमयलक्ष्यतावच्छेदकावच्छिन्नानन्तप्रकारावच्छिन्ने श्रीमति भगवति सर्वतन्त्राणां स्वातन्त्र्यत्वेन तात्पर्यमिति शाठकोपबौद्धाः स्वानुकूलयन्ति। अशब्दमस्पर्शमरूपमव्यये प्रकारप्रकारीभावोऽपि रभसवाद एव, स्वसमयविभवपराभवनिदानं, द्रविणप्राचुर्यवतां स्वान्ते याचकभयमिव। वन्दारुजनमन्दारेन्दीवरश्यामलकौसल्यानन्दवर्धनानन्तविशेषणावच्छिन्ने रामाभिरामेऽपि व्यावर्तकोपरञ्जकविशेषणद्वयमपि स्वापकल्पितमहदैश्वर्यं स्थिरम्। पञ्चसंस्कारत्वावच्छेदकावच्छिन्नत्रित्वाकारत्वावच्छिन्नसात्त्वतसमये कृत्स्नतन्त्राणां तात्पर्यं वराकत्वेन न प्रतिपादयामः, परमनवद्यत्वेन स्वतः प्रतिपद्यत इति।

मापकशतैरमाप्यं तत्त्वम्

परमेभिर्मापकैर्न मातुं प्रभवन्ति सूरिकुलवरीवस्यमानाः शेमुषीकाः स्वसमयम्। सत्त्वापत्तिपदार्थाभाविनोतुर्यगादिसप्तभूमिकानवच्छिन्ने सत्त्वमात्रानुयोगिनि सकलतन्त्राणां पारवश्यमन्यथा समाजसमजयोरभेदाद्भिन्नजिज्ञासाधिकरणं विशयप्रौढत्वमवगाहते। प्रेक्षावत्प्रवृत्तिजनकतायां सत्त्वासत्त्वान्वयव्यतिरेकाभ्यां मेषाण्डस्य कियत्फलमिव निष्प्रयोजनमवधेलिमं भिन्नदुरितव्यूहप्रशमनार्थमभिन्नभद्रकमाचरितं तन्न स्वकाले कालक्षेपायितम्। वैतथ्यमपि साकल्येनाहोस्विच्छाकल्येन प्रतिपाद्यते शकले समुपपादनपरत्वेऽन्वयव्यतिरेकमापकविरहाद्वैविध्यमापादयितुं शक्नन्ति विदग्धाः। तथ्यातथ्यबलाबलागमसाधनबाधनविचारणावसरे निगमपरिपन्थिपशुचोदितचोद्यस्यापि प्रतिवचनीयतामिति चेदयुक्तम्। किमलौकिकलौकायतिकाः भगवति निगमे स्वमापकत्वं नाभ्युपगच्छन्ति। अध्यक्षमापकं प्रकारान्तरेण समर्थते किङ्किलपङ्किलक्षालनकिलालं पुरुहूतेनापि दातुं न शक्यते। समभिगतकृत्स्नतन्त्रसारनिर्मत्सरवतां प्रेक्षावतां

सविधे भृशं दुर्वैतण्डिकेनापि दुर्वितण्डाकर आपादितमेव। प्रतिपित्सितानिर्वचनीयनिबन्धे समवबन्धनं बबन्ध।

भिन्नसत्त्वदुर्व्यसनशकलनम्

श्रुतिस्मृतीतिहासपुराणदर्शनप्रामाण्याभ्युपगमे प्रामाण्यत्वेऽपि प्रतिमापकजालायितत्वादनवस्थितिः। सर्वसत्ताकत्वशुन्यत्वापादनमभिन्नसमयवादिभिर्न शकलायितं परं भिन्नसत्त्वदुर्व्यसनं शकलितमिति। 'अतुलितबलधामस्य पुस्तकोऽयमिति' निदगता प्रियधाम्नि निहितमितिवदुन्मत्तकल्पसन्निपातप्रलापमभाषि चोद्येन। प्रत्यक्षमप्याकलितमनुमानेन बुभुत्सन्तेऽखण्डतर्काण्डवरसिकाः पूर्वे व्याचकुरिति वैखर्या न परिचिचीषन्ति केवलतत्त्ववन्निभालनीयम्। दृशि स्वाभाववति प्रतीयमानवैतथ्येन नेदं विशयविषयीभूतप्रपञ्चवैतथ्यं निष्पद्यते। प्रपञ्चो मिथ्या परिच्छिन्नत्वादित्यनुमाने प्रपञ्चनिष्ठोद्देश्यतावैतथ्यभूतविधेयबोधोऽपि केवलव्यावहारिककालावच्छिन्नं न तु पारमार्थिकसत्त्वावच्छिन्नं तदवच्छेदकधर्मानवच्छिन्नत्वात्। प्रपञ्चाभाववति प्रपञ्चप्रकारकज्ञप्तिः मानमेयभावद्वारोपपन्ना—तथा ज्ञानज्ञेययोरुपपादनं द्विशफत्वावच्छिन्नवाजिशाला मृग्यताम्। विमतं वितथं दृश्यत्वादिति साध्यसाधनानुमानं तमसि सन्न्यस्तम्। पर्वतो वह्निमानितिवत्साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्य-निष्ठप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नपक्षनिष्ठविशेष्यताक बोधजनिका प्रतिज्ञा सन्न्यस्ता। किञ्चात्क्षणिकसमये रसवत्यां सहजाध्यक्षत्वात्प्रतिज्ञायिता, किन्त्वभिन्नसत्त्वनिर्वचनकर्तृसमये तदभावात्प्रतिज्ञापगतेति सुघटमेव। विमतवैतथ्ययोः कस्सन्निकर्षः? समवायस्य निर्वचनम्'शक्यं नित्यत्वे सति सम्बन्धस्यानित्यत्वात्'संयोगस्तु द्रव्ययोरेव चितोऽद्रव्यत्वात् सम्बन्धिद्वयभिन्नत्वे सति सम्बन्धिद्वयनिष्ठत्वे सति विशिष्टप्रतीतिनियामकत्वमितिमञ्जूषालक्षणमप्यलक्षणमेव विशिष्टप्रतीतिनियामकविपर्ययात्सम्बन्धस्य निर्वक्तु-

मशक्यत्वाद् मेघचिह्नमापतितम् । पक्षतावच्छेदकावच्छिन्ने पक्षनिष्ठ-विशेष्यकज्ञानेऽपि साध्यतावच्छेदकावच्छिन्नविषयस्य सन्निकर्ष-विरहात् । पक्षीभूतस्वाभाववति चित्याध्यासिकतादात्म्यसम्बन्धस्तु निश्चप्रचं विगलितः । विमतनिष्ठोद्देश्यतानिरूपितवैतथ्यनिष्ठविधेय-ताकबोधे विमतवैतथ्ययोस्सन्निकर्षोऽभिन्नवादिसमये परागतः । किंलाक्षणिकनाकपतिरपि स्वतीर्थसमयेऽनाकलितमितिज हाति । भिन्न-वादिकालसमरक्षितसम्बन्धासत्त्वेऽपि निर्विशेषाभिन्नवादिकाले आध्या-सिकनादात्म्यसम्बन्धस्योपपन्नत्वान्न काचित्क्षतिः त्रिकालाबाध्यसत्य-तथ्यमुद्दिश्य जगद्विधानं विधेयमतथ्यं क्वचिदपि प्रसिद्धिव्यतिरेका-त्तथ्यातथ्ययोः कृत्यनिदानभावस्तु धीधनव्युदशनमेव ।

शुक्ताविदं रजतमितिवित्तौ शुक्तिशकलानुयोगिको रजतप्रति-योगिकः बोधस्तुल्यवित्तितया प्रयोगाधिकरणकालावच्छिन्नहट्टस्थरज-तस्य न तु कल्पितस्य, कल्पितप्रत्ययोऽप्यप्रत्यय एव । तथाच 'पूर्व-दृष्टावभास' अध्यास लक्षणं सम्परीक्षितलक्षणमिति । पूर्वदृष्टचर-प्रत्ययाभावादिदन्त्वेनावभासोऽलक्षप्रत्ययः । उद्देश्यतावच्छेदकावच्छि-न्नानन्तप्रकारानवच्छिन्ने चित्याध्यासिकतादात्म्यसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रपञ्चाध्यासोऽनुपपन्न इति चेन्नाद्य-विद्यावच्छिन्नत्वादिदृष्टम् । पूर्वाध्यक्षप्रत्ययविरहत्वमयुक्तं निर्मल-नयनगोचरीभूतायां रसवत्यां सहजाध्यक्षे जाते गोत्वनिष्ठोद्देश्यता-निरूपितसाध्यनिष्ठविधेयताकसम्प्रत्ययः न चिन्निषेधयोः सम्प्रति-पत्तिः । चिदनुयोगिनि प्रपञ्चप्रतियोगिकत्वं भिन्नसरणिसमाकलिते नाभिन्ने पूर्वप्रत्ययसम्प्रतिपन्ने शुक्त्यवच्छिन्ने चिति वैतथ्यभूतरजतत्वा-वच्छिन्नाभासः नहिनिर्मले चिति विष्टपाभासोऽतीतप्रत्ययप्रतिपन्नः । अतश्चिति, विष्टपवैतथ्यसिसाधयिषाविरहत्वादव्याप्तिज्ञाननिदानिका प्रतिज्ञा शकलितेति तन्नयुक्तमर्थक्रियाकारितारूपगोविलासमात्रत्वा-च्छब्दवैखरिभरीकृतापाद्यापादकभावजिहासायामापादकमन्तरापाद्य –

कल्पना दुरधिगमा। प्रतिपन्नोपाधावपि विप्रतिपत्तिडाकिनी विनानुगमपूर्वकं प्रेक्षावच्छेमुषीमत्ति, दुरधिगमागमशेमुषीकमानविमानकलाकरेणानुपूर्वकगमेः स्वरूपं निर्वचनीयमेव, अनिरुक्तेर्निरुक्तिरपि शाब्दिकनाकपतिना नाभिमानं धत्ते।

अनभिहितप्रतिवचनविप्रलम्भनम्

अनभिहितप्रतिवचन आशामोदकभरितोदररसवीर्यविपाकात्समजनितवन्ध्यासुतकृष्णसूरितनयोऽयमिति विप्रलम्भितं न तु तथ्यपथ्यमाचरितम्। निवर्त्यनिवर्तकमापकशतसम्प्रयोगे दुर्विदग्धतर्कताण्डवसरणिर्न शमस्ति, क्रियाफलशालिनी कठिनी कल्पनेति न समीहामहे। अथावाच्यकुलवैभवपरम्परेयमभिन्नसिद्धिर्नायं विश्वजनीन प्रेक्षावत्कुलवैभवः। शब्दज्ञानानुपाती वस्तुशून्यत्वप्रतिपत्तिमूलकस्वरूपं शमोहामहे। समाधिपादीवमाहर्षोऽयं सूत्रो वस्तुशून्यमपि प्रत्येतीति तदपरे न क्षमन्ते। अभावप्रत्ययालम्भनादशायां शब्दवैखरीत्वेऽर्थसन्निकर्षाभावात्समर्थक्रियाकारित्वार्थविप्रकर्षात्, सम्प्रत्ययत्वप्रेक्षावदास्यप्रसूतप्रमेयप्रामाण्यस्य नानर्गल्यम्। स्थविराक्षपादसमयभिन्नमूलकत्वाद्भिन्नाभिन्नसमयोऽजहति। षट्कसम्पत्तित्वावच्छिन्ने वेदान्तदेशिकः समाम्नायाम्नायशिखरमुपदिदेश। सर्वमात्रातात्पर्यावबोधनाक्षमाः प्रत्यवतिष्ठन्ते। उपहितभिन्नेऽपि सर्वमात्रातात्पर्याभिन्ने न विशयावसरो भिन्नवादिनाम्। शब्दब्रह्मनिष्णातदाक्षिनयप्रेक्षाप्रौढिप्रसूतच्छन्दानुशासनमभ्युपगमंवादेनाभ्युपगच्छामः। सुललितपदविन्याससुमनोगुम्फनमालिनापि नेदं प्रतिवचनीयं समभ्युपगम्यमाने सरलतरलवरलनिलिम्पगिर्विलासे कृत्स्नशब्दसाधुत्वस्य नैदंपर्यत्वात्। हानोपादानक्रियाकर्मावसानत्वाच्चिति शकलिता शब्दसंसृतिः। परसमवेतक्रियाफलशालित्वनिरुक्तिरूरीकृते कर्तृत्वप्रतिपन्ने कर्तरि न समजनि भावः संख्यावत्प्रौढिमात्रमनुभूयते। एवञ्च बहुलमापकसिद्धीकृतशाब्दिकशब्दनिर्वचनमर्थक्रियाकारितायामिति।

'संसृतिवैतथ्यप्रत्यपिपादयन्तो लोकालौकिकभावाः भिन्नाभिन्नायितुं विप्रतिपद्यन्ते। भिन्नदेवमातृकेऽभिन्ननदीमातृकायितुमीहन्ते वा विपथीनन्ति किलाभिन्नद्रविणगहने। नहि कुलाचारप्रतिपन्नसम्प्रत्ययविभवपराभवश्चित्प्रतिपत्तिकरः 'आश्रयत्वविषयत्वभागिनि चिति निर्विभागत्वं' स्वतः प्रतिपद्यते। न च सम्विदवतोऽपि सात्त्वतबौद्धसमयानुकूलमेवाध्यक्षानध्यक्षाधिषणत्वेन न तथागते बुद्धत्वं परं सत्त्वासत्त्वतत्त्वसम्वेदनपरतमा मात्रार्थदक्षिणाः बौद्धः विपर्ययत्वं परापयन्ति। आर्थिकवैतथ्यं कण्ठोक्तं वा भृशमनाकलितविश्वजनीनतीर्थकालावबोधनेऽदक्षिणविश्वे भाषितपुंस्काः पदज्ञाः विलसन्तु नाम, परं पदप्रत्ययान् वाक्यार्थान्प्रतिपद्यन्ते किं, मानी न प्रमेयत्वावच्छिन्नतात्पर्यप्रत्ययदक्षिणः। यदि सर्वत्र सर्वगतप्रत्ययतुल्यत्वाभ्युपगमवादी तदा विश्वप्रत्ययवादीति नः सम्प्रत्ययः, परं न तथा करणाकरणीक्रियते। तर्हि वव सम्प्रत्ययः, सम्प्रतिपत्तित्वावच्छिन्नविशेष्ये धर्मिणि न साध्यप्रकारत्वावच्छिन्नप्रतिपत्तिः, मुरजरव करणीकरणसमनन्तरं लास्यदक्षिणो न प्रत्येति तालमिति न, परमरुणकोपज्वालामालेऽपि तालवित्तिपादक्रमो वित्तिपति। अतोऽध्यक्षत्वेऽपि प्रत्ययविपर्ययः किन्नाम चित्प्रत्ययगोचरीकरणे तथागतसमयपाटचराणामिति मा चोद्यतां विश्वकरणालातत्वात् न वयमिदमावेदयामः सम्प्रत्ययवत्प्रतिपन्नसमयमानममानीभवयाम इति, परं सम्प्रत्ययवादीविभवस्तेन कवलीकृतत्वात्कदर्थितसमयः। ननु 'पूर्णमदः पूर्णमिद'मिति शातपथीश्रुतिमानमानीकृत्याभ्युपगच्छामः पूर्णत्वमिति चेन्नासम्भाव्यविशयप्रतिवचनमशकलितम्। आनुपूर्विनिगमान्तदेशिकवचनरचनप्रामाण्यमुरीकृत्य कदर्थितसमयं सम्प्रतिचिख्यापयामः। ऊषवति वनवनप्रोक्षणार्थक्रियाकारित्वं परागतप्रयोजनम्। लेखा अध्यक्षाः देवविषयत्वादिति व्याप्तिवित्तावपि वैष्टपेयप्रसिद्धिविरहादामुष्मिकव्याप्तिवित्तिमुखरवैखरीविमानं स्यात्। लेखानां लेखत्वस्यामरादिकोषकवलीकृतान्तःकरणधीघनविषयत्वात्।

इन्द्रियत्वधातुत्वयोर्वाचकभिन्नत्वेऽपि वाच्यमेकम्

स्वतः प्रकाशाभिन्नकाले देवत्वनिरुक्तिरपि धातुत्वावच्छेदक धर्मावच्छिन्नधातुत्वेन नावगम्यते। गम्यगमकनिदानपरिचोदितधातुत्वानवच्छिन्नरूढ्यर्थं गमकत्वात्। नच प्रतियोगितानुयोगितान्यतरसम्बन्धेन घटवद्भूतलमित्यादिवन्नानर्थस्यार्थवत्त्वं गम्यतामिति चेदयुक्तम्; देवत्वेन्द्रियत्वयोर्व्यधिकरणधर्मावच्छिन्नत्वात्सामानाधिकरण्यमुरीकारो दुर्ग्रहः परीक्षितसंग्रहमापकत्वं स्वान्तयन्ति दुर्विदग्धाः। त्रिभुवनविलक्षणवैदग्ध्यापाद्यमानाः न क्षमन्त अत एव प्रत्यवतिष्ठन्ते। परं परात्प्रति प्रत्यवतिष्ठमानानामगदः दुर्वैतण्डिकभिषजाम्वरैः सदसद्विलक्षणाकरे दत्तः। धिषणसंग्रहविरहादतस्मिन्तद्बुद्धिरित्याकरेऽभाषि। 'तद्विद्धि प्रणिपातेने'तिजये शौरिपार्थचोद्यप्रतिवचनमपि पूर्वदृष्टावभास इति न दुर्लक्षणगर्तव्याप्तत्वात्। 'वाचारम्भणत्वात्' विदग्धस्वान्तवैदग्ध्यप्रकल्पनमात्रं न प्रत्ययाप्रत्ययविमर्शः सास्वतबौद्धकुलसरणिरसरणीस्यात्। अन्यथा पशुःपक्ष विपक्षयन् समजसमाजयोः प्रचुरवादविभवःपशुःपक्षः। कास्त्न्यतीर्थहृदयसमयपाटूपटक्षीकृतदर्शनविभवो विश्वजनीनसम्विद्विषयः न काथिककदर्थितविषयः। तदैक्षदिति श्रुतिशिरष्कवचनप्रामाण्यमन्तःकरणानवच्छिन्ने चिति शकलितम्। अन्तःकरणावच्छिन्नप्रमातृचैतन्य एवैक्षत्क्रियापदसमभिव्याहाराच्छुद्धे तद्विरहात्। अन्तःकरणानुपहिते निर्मले बहुत्वैकत्वेक्षणाभिन्नवादीभवरसमयं सन्न्यस्यति। स्वान्तच्छुन्येऽघटितघटनापटीयसी दुर्लक्षणाशवलिते समीक्षणं युक्तमिति मा वादीः। दुर्लक्षणाधिष्ठानं किमनधिष्ठानमिति न भद्रमावाराधेयभावो वैभिन्यग्रस्तत्वादभिन्नकालाक्षेपः। प्रतिवचनपाटूपटविलक्षणधीचोदितकाथिकभद्रकमिति मुखरीभावस्तु स्वान्तेवसत्कुलतोषाय, न लाक्षणिककुललक्षणावलीवादवैभवे। प्रातिलोम्यानुलोम्यविलक्षणकथावक्तृधीत्वावच्छिन्नस्य का चोदना, यस्यां सर्वसत्त्वापन्नचिदेवाग्र-

सत्त्वम्। सत्त्वचित्त्वालक्षणाम्बरसुमनस्त्वखिलसितषण्डतनयोऽयं पथीनतीति कः सन्प्रत्येति। नहि शब्दभूरीलक्षणमात्रजन्यविशयप्रत्ययः, सामान्यलक्षणाप्रत्यासत्तिमूलकं हृद्यं साधारणासाधारणलक्षणानुगुण्यं लक्ष्यप्रतिपत्तिरिति न समीचीना, सम्प्रतिपत्तिसत्त्वे सम्प्रति तद्भूक्षिणी विप्रतिपत्तिः कौतष्कुतस्समजनि। अलक्षणलक्षणप्रतिविपादयन्नात्रापि विशयकष्मलव्रातविप्रकृष्टे जाते सहजलगनतया सन्निकर्षति। सन्निकृष्टविप्रकृष्टत्वञ्च कालकृतसहजभेद एककालावच्छेदेन व्यवहृतिं न सम्विभिनत्ति देशकालवस्तूकृतसन्निकृष्टविप्रकृष्टत्वादिसम्भेदो न कालीकृतव्यक्तिव्यवहृतिसम्भेदात्। एकत्वानेकत्वसम्वृत्तिः व्यावृत्तिजनिकैव न भिन्नत्वापादिकेति नापि शरभकृतविषयव्यवहृतिः, सम्वेदसम्प्रयोगकलापधीगम्यत्वात्। निर्विशेषनिर्विषये मानसोल्लासाभावात्। अचित्त्वधर्माविच्छिन्नस्वान्तश्चिद्विलक्षणसन्निकर्षविरहात्कथङ्कारं सम्वित्तिगोचरः गोचरसञ्चारानाचारप्रसंगात्। हृद्गोचराभावस्तु न तथागतप्राचीनपराचीनपरावरसमयप्रतिवादिभयङ्करः पराहतः। नायं व्याकरणिकुलधर्मः, विगलितसमयसमयितं स्यात्। कृत्स्नतीर्थव्रातकालस्वान्तगोचरीकृत्य सर्वतन्त्रस्वतन्त्रमापकमतीकृत्य च स्वान्तगतपदप्रयोगः प्रवर्तते किल 'मनसैवानुद्रष्टव्यमिति' आम्नायान्तरे च 'यन्मनसा न मनुत' इति वैविध्यापादनपराम्नायवचने सुचोद्यमवतरति, जडत्वधर्माविच्छिन्नस्वान्ते दृशप्रकृतित्वावच्छिन्नधर्मो वास्तवो वा, तव्यति काचन सत्ताभ्युपगन्तव्या। नहि प्रत्ययमन्तरा 'प्रकृतिजन्यबोधे प्रकारो' न भावयति। यद्धर्मावच्छेदेन दृशितत्त्वं तद्धर्मानवच्छिन्नं तव्यति न मनोरमः, प्रकृतिप्रत्ययार्थयोर्वैयधिकरण्यधर्मावच्छिन्नत्वाद्गोत्वाश्वत्ववत्। गोत्वधर्मावच्छिन्ने गवि नाश्वत्वं तथा द्रष्टव्ये प्रकृतिप्रत्ययार्थस्य भिन्नाधिकरणत्वे चिदेवैकार्थापादनं त्रैकालिकनिषेधप्रतियोगित्वमेव। तस्मान्निखिलप्रकृतिप्रत्ययार्थानां भिन्नधर्मावच्छिन्नत्वाद्दाक्षीतनयशब्दसाधुत्वागमनियमः कान्तारे कांदिशिकायते इतिनानाद्यविद्यानिर्वचन-

शक्तिमत्त्वात्। कर्कशान्वीक्षिकक्षुरप्रहर्षप्रकर्षविदग्धेनान्यत्रोपपादि न सञ्चारः। पुरातनविबुधा जगुरितिमतिदुर्मतिमतिमताम्बरदुर्ग्रहोऽपि स्वतन्त्रसमयपालनपरवशो न तु, एकोपनिबद्धाशेषार्थप्रतिपादकः। दाक्षितनयागमागमनावसरे फणिपतिना भाषितमपदं न प्रयुञ्जीत इति, आत्मधारणानुकूलव्यापारसत्तार्थकभवतेरपदमभिभाषन्ते शाब्दिकाः। तत्किं शब्दशक्तितात्पर्यविधारणरूपविचारितविचारोऽविचारितो वा। अविचारितेऽमृतान्धसां प्रियः कृतस्नानुश्रवसारसरसोऽहमित्यनास्येन भाव्यम्। विचारितेऽपि विपश्चिच्छेमुषीगोचरसञ्चारप्रत्ययो न कालसिद्धिः। तस्माच्छ्रुतिशिरष्कविधिनिषेधवचनस्य शुद्धाशुद्धे च तात्पर्यमित्यनवद्यम्। चिद्विलासमनष्कामनान्तःकरणावच्छिन्नचैतन्यव्यापारत्वं केवलान्तःकरणस्याचित्त्वधर्मावच्छिन्नत्वात्काथिकदुर्ग्रहावतारे न वस्तुतत्त्वप्रपञ्चने, नाप्यचित्त्वधर्मःशक्नवलं निषेधति। असुरवादकाथिककुलमानसे परकाथिककुलमूलवित्तिविच्छित्तित्वे सर्वमूलं छिन्नम्। सर्वमूर्तद्रव्यसंयोगित्ववादिभिस्तन्न भद्रमाकलितं, 'भद्रं कर्णेभि'रितिभद्रसत्त्वमापकशतन्नजानते, समधिगम्य जीवत्वधर्मावच्छिन्नजीवे मनस्त्वप्राणत्वकलेवरत्वाद्यचित्त्वधर्मावच्छिन्ने चित्त्वधर्माच्छिन्नो जीव इति न विषमसमयवादिभिश्चेकीयते। चिति भूयस्त्वधर्मावगाहिप्रत्ययविशयोच्छेदानर्गलं स्यात् केवलत्वमेव गम्यते चेद्विविधप्रत्ययविषयो दुरधिगमत्वान्न तद्विधप्रत्ययगोचरः। विषयविषयीभावाभ्युपगमसमयोऽपि भिन्नक लकवलीकृतस्तत्रागमप्रामाण्यागदसेवननियमपरिपालनद्वारमधिगत्यापि राजयक्ष्मो न विप्रकृष्टायितः, विषमप्रत्ययशमनधिषणेनापि शमनवमनीकृतं न शमनं, शमस्ति न शमस्तीति समीहायां विषमडाकिनी निलीना सत्यापतिता। नहि चिति भवति श्रीमति वादिनि निष्प्रपञ्चत्वं प्रतिपन्नतमं येन विश्वशब्दालापापाकरणधिषणधीः प्रभवेद्यस्य वाक्प्रतिपन्नशब्दान्तरसञ्चारविचाराभावदुरधिगमत्वं जगुस्तत्सम्प्रत्ययसन्तानवितानपराचीनभावः कथं भावैर्भावयितुं

युक्तमिति मा, भावाभावविभावच्छब्दसन्तानसाहित्यत्वावच्छिन्ने पुरुषे प्रथमकालनिहितभावो द्वितीयकाले विरहादस्माकमन्वयः स्थैर्यः। न च भावकालापास्यवैखरीकृतभावत्वं कथं त्रिकालाबाध्यत्वमनाविलमित्याशामोदकपरिपाकमपास्तम्। तर्के सम्प्रति स्थितबोधानुरीभाव्यमाने किल्लाक्षणिकाः प्रत्यवतिष्ठन्ते चेन्मैवम् किल्लाक्षणिकतर्कालापमापके किंविनिगमकं विनिगमनविरहवतां किल्लाक्षणिकानां तर्कदुर्ग्रहान्नस्संग्रहाच्च। 'तर्कोऽप्रतिष्ठानादि'त पाराशर्योऽभाषि तथासति शुक्लचिदपि निर्योज्यानुयोज्यतर्कत्वावच्छेदेन व्याप्य इति चेन्न कोहि तर्कः किमवच्छेदेन तर्कत्वमभ्युपगम्यते तत्र सम्प्रत्ययावधारणविलक्षणतार्किकस्वान्तगतभावतर्कपदार्थ इति शिष्यगोष्ठीकथा तर्कस्यानिर्वचनात्। चित्रनिरुक्तचित्तर्कत्वमपि किं तर्कवितर्के च प्रतिपन्नोपाधित्वमेव चित्त्वावच्छिन्नतर्कत्वं भृशमसमयितं तन्न प्रतिपाद्यप्रतिपादकविलक्षणसन्तानस्वरूपमेव प्रतिपद्यतामन्यथा चिति विचिद्भाव इतिमुखरितास्यव्यापारे चेखिद्यमानविषयोऽलक्तविशयः।

तथासति काथिकायमानदृष्टसागरमनोव्यापारवीचिपथपराभूतनिवर्त्यनिवर्तकभिन्नत्वावच्छिन्नविकल्पसन्तानस्वान्तेवसत्कुलाऽऽस्फोटपूर्वकच्छाखव्याचिख्यासितः समयसमवबोधयितुं युक्तम्। परमप्रतिवादिकुलतर्कविभवो वादिनिकरपराभवे निर्गलितार्थवैभवसन्दर्शने चानवद्यं ब्रह्मा। त्रिकालाबाध्यसाक्षित्वधर्मावच्छिन्नापरिच्छिन्ने तर्कत्वावच्छेदेन कथमवच्छेदकीस्यात्।

चिद्दुर्लक्षणयोर्निरुक्तिरशक्या

प्राञ्चो विबुधवृन्दाः—अघटितघटनापटीयसीदुर्लक्षणलक्षणापादने चिद् लँक्षणयोस्समलक्षत्वात्तर्कदुर्लक्षणयोर्विषमत्वापादने गुरुधीघनोऽपि परोहतः। अनादिभावरूपत्वादिसत्त्वेऽपि वित्तिनिवर्त्यत्वादतिप्रसक्तिर्लक्षणवैषम्यमित्यपि सम्वित्तिनिवर्त्यत्वतात्पर्याववोधनात्

गिविलासगम्यगमकभावानतिरेकपक्षकत्वव्यावर्तकतर्कस्वरूपजनकव्यावर्त्यभावोऽभिन्नपक्षसिद्धिकत्वमूलकमेव । न तद्विबुधवरस्वसम्वेद्यसम्वेदकविलक्षणस्वान्तव्यापारमात्रं तथा सति देशिकवरीवस्यानुकूलसमर्जितकालक्षेपः स्यात् । 'किमिच्छन् कस्य कामाये'ति श्रुतिकल्पवल्लिर्यदवगतं सत्स्ववृत्तितयेष्यमाणत्वमनुसम्वेदयति । 'विषं पीत्वा क्षयं गतः' इत्यादिपदकदम्बतात्पर्यानवबोधनाद्यथा शतंजीविदेवदत्तः शमनक्षयपथिकत्वं सम्विदि विकल्पते न तथा श्रुतिशिरष्कतात्पर्याभावात्क्षयपदमन्यत्तात्पर्ययति । षण्डजन्यवन्ध्यासुतशमनक्षयपथिकायमाने न विविक्तं किमिच्छन्नित्यत्रेच्छतेः कर्तृत्वसमन्वयपूर्वकतात्पर्यविधारणंसुधीकुलसरणिः । विश्ववैतथ्यप्रतिपादयतामभिन्नवनेचराणां सिद्धिसमयासमये व्यवहारत्वलिङ्गवचनमेव भिन्नगहनेचरेभ्यः प्रतिदुरभिसन्धिपूर्वकप्रख्यापनमिति । तस्मादभिन्नवैखरीव्यापृतक्रियाकलापरूपं भिन्नं प्रतिवचनीयम् ।

चोद्यप्रतिवचननिकरबद्धमूलपूर्वकवादिप्रतिवादिस्वान्तप्रतिपन्ननिर्धूतामलानन्दे चित्यन्तःकरणविरहादिच्छतेः किमिति सर्वनामत्वावच्छेदकतर्कलौकिकव्यवहारदुर्व्यवहारादवच्छिन्नवृत्तिकान्यस्यावच्छिन्नवृत्तिकत्वं, नहि व्याप्यारोपेणव्यापकारोपनियमो गुरुमतिमधिरोहति । क्वसम्प्रत्ययनियमप्रतिपन्नजनकानन्दनिबन्धनबचनोपालम्भो वाचस्पतिनियमानुगुण्यं समसमयग्रहग्रहिले विषमसमयगम्यत्वात् । प्रकरणसमसंगतिव्यङ्गकमतिकल्पलतिकामाकलय्य सुधर्मणि विबुधकुलतिलकवादविषये निलिम्पदेशिकस्यानभिसन्धितवचसि लेखपतिसाक्षित्वेऽपि दुर्बोधः । तर्कवैभवस्यानभिसन्धितकिल्लाक्षणिकानधिगतसरणिः, नहि कमलविलोचनमनोहरक्षयनिर्माणकौशलिकक्षणिकतर्कमात्रेण क्षयः सम्पद्येत विश्वप्रत्ययविरहात् । शब्दशक्तितात्पर्यावधारणासाधारणभिन्नकौलिकविचारिततर्के चिति तात्पर्यावधारणमपि न निगमानुमतिः सर्वप्रत्ययसम्प्रत्ययसाधारणधीचोद्यानां चिद्धनानन्दवादिनामैदम्पर्यव्यतिरेकित्वं कथमवगच्छति । एकमुक्तौ-

सर्वमुक्तिविरहाद्वाग्विलासापन्नः तर्को न तथ्ये चिदवगमे प्रत्ययागमः निश्चप्रचं दुष्काथिकवैखरीविषयः वाच्यवाचकसामान्यप्रत्ययोऽस्मत्प्रत्ययगोचरे युष्मत्प्रत्ययगोचरसत्ता न बिरज्येत, प्रामाण्यप्रकरणसम्वलिततर्कलतिकापि वैतथ्यमिति । सनातनबुद्धसमयशकलीकरणधौरेयतथागतानामतद्व्यावृत्तितत्त्वं सकलविकलकर्म विपाकान्वयव्यतिरेकप्रतिपत्तिकरदनुजमनुजसमाजसमजानां कालिकभिन्नत्वसिद्धिरतद्व्यावृत्तिलक्षणो न तु समष्टिलक्षणः सम्विदोऽविकलत्वं संख्यापनात् । पुनस्तद्वृत्तिव्यावृतिसमधिगताविकलप्रत्ययनिकरप्रमेयत्वमक्षिचरणस्याप्रमेयत्वं केन व्याप्रियते । प्रमाणप्रमेयभावप्रत्ययगोचरः कुसंख्यावत्प्रवृत्तिलक्षणः कौतष्कुतः समजनि । मा भैषीः निष्प्रत्यूहनिगमव्यूहरचनाचतुरसुधीकुलशेखरकौतुकीकृतकुतूहलेनान—धिगतं कथातत्त्वमित्यनलीकृतविषये का कथा । चरमतत्त्वनिवृत्तिरपि परपक्षसम्विद्विरहादात्मख्यातिरितिहीनयानीयसमयं न विवरीतुमीहामहे प्रतिपन्नमाप्यमापकभावो हातुमशक्यत्वात् । अविधित्सितहानोपादानकर्तृकर्मस्वरूपसञ्चिकीर्षमाणजिहासितं न स्वान्तगताखिलराद्धान्तः प्रमेयवादिकथायां सर्वप्रमेयसिद्धत्वं गरलसम्पृक्तविशयत्वान्न साम्प्रतम् । तस्मादपि चित्त्वप्रत्ययत्वसर्वगतत्वानामिदमित्थमित्यनास्थं, चित्प्रत्ययस्यानास्थत्वे मतिगोचरानुभवत्वं नास्यानाश्यविषयस्थैर्यं नानुभवसत्त्वग्रहः । विप्रपसत्त्वासत्त्वविशये परीक्षिताध्यक्षप्राबल्यं वरीवर्तीति पूर्वे व्याचकुः ।

काथिकाप्रमाणकथाक्षणे सञ्चारीभावोऽस्तु व्यभिचारीभावो मास्तु चिद्व्युत्पित्सूनां 'तस्मिन्दृष्टे परावर' इति निदानत्वेन परं कृतकत्वेनावरत्वं व्याचिख्यासितार्थस्य ध्वंसाप्रतियोगित्वं स्थाने, श्रुतिचोदितपरत्वापरत्वव्यवहारावच्छिन्नसर्वाधिष्ठानापरोक्षव्यवहारहेतौ चिति दक्कालावच्छेदेन विश्वकल्पनं युक्तम् । 'यथोर्णनाभिः सृजते' प्रपञ्चाधिष्ठानभूताभिन्ननिमित्तोपादानान्वयत्वं ब्रह्मण इत्यभिन्ननिमितो-

पादानकारणत्वावच्छिन्नस्य ब्रह्मणः परत्वे इदन्तया नयनगोचरीभूतप्रपञ्चजातस्य कार्यतावच्छेदकभवरत्वे नाभ्युपगमवाद इति चिद्विलास प्रेक्षावत्सम्वित्गोचरः। अस्मदि भावे युष्मत्प्रत्ययगोचरः प्रकृतिसिद्धिमानापनोदनविषयः, पूर्वसिद्धप्रत्ययसञ्चारपूर्वकपश्चाद्भाविप्रत्ययः प्रकरणसमसामान्यविषयपरिभावितानल्पसंख्यावत्सम्प्रत्ययसंदर्शनमिव स्यात्। अतस्सर्वप्रत्ययगर्हितस्वान्तप्रवृत्तिरपि न व्याप्तिधीविषयः। सकलप्रत्ययस्यैकप्रत्ययत्वमेवोरीक्रियते चेत्तदायं निलिम्पानां प्रिय इत्युक्तवति हीनार्थवादं कथं प्रत्येति। 'ब्रह्मविद्ब्रह्मैव भवतीति'स्तुत्यर्थवादे निलिम्पानां प्रिप्रधर्मत्वावच्छिन्नाहंप्रत्ययो नापह्नते। अपह्नववचनाध्यारोपापवादन्यायगर्भितत्वाद्युक्तमिति न वाच्यम्, अनुश्रववचनानुमोदिततात्पर्यानधिगतनिखिलैहिकवस्तुप्रत्ययाप्रत्ययत्वात् व्यावहारिकक्षयप्रत्ययजाते चोद्यप्रतिवचनमन्तरा न कोऽपिसम्प्रत्ययवान् क्षयं निर्देष्टुमर्हति। कुत्सितकाथिकभिन्नवादिनां सविशेषकालप्रत्याख्यानं सच्चित्तेप नहि भूयस्त्वाम्नायवचनप्रत्ययसामान्येन विशेषेण वाधिगन्तुमीष्टे। सन्निति सत्तामात्रावगमात्सन्प्रत्ययसामान्येनाभिन्नत्वसिद्धिरिति भणकानामाभाणकेन किं, सन्प्रत्ययोऽपि भिन्नसत्वावच्छिन्नाधिकरणमेव। अथ न स्वरूपसम्वित्प्रेक्षावदामोदकरविषयः, वृत्तावुपयुज्यमानोऽपि सत्तासामान्यप्रत्ययवतां सम्प्रत्ययविसम्प्रत्ययभेदे समविषमसमानानुकूल्यत्वेन भुवनभवनानुकूलव्यापारत्वं भावस्वान्तसम्वेदनमात्रं स्यात्। सम्प्रेक्षिताभिन्नप्रत्ययवति समभाजकप्रत्ययेऽनूचानानां वैखरीत्वं समभाजि तथाचैकसिद्धित्वे सकलसिद्धिरिति वादीभभणितिरभणितम्। अतोऽद्वयवित्तिसम्भवे सर्ववित्तिसम्भव इत्यनधिगतव्यवहारप्रत्ययः: 'ओमिति मरिष्यती'ति पाराशर्यप्रतिवचनमन्यथा दुर्गलितं खाष्डनिकसरणितरणिकरतरुणत्वे प्रतिवादिभयङ्करवाचोभङ्गीनिर्मूलनाभिविधिमूलकमिव चेत्कौशिकजगत्यतीतानागतप्रयोगाधिकरणकालेतरणिविरहात्किमिवोच्यते विषयत्वम्।

नहि घूकप्रत्ययवद्विष्टपप्रत्ययं निरमायि वाचस्पतिना, दिव्य-प्रबन्धप्रबन्धमानासाधारणमतिमताम्बरप्रबन्धितप्रबन्धकल्पकालाकालकरणे कोऽपि धिषण उद्यामवतरेत्। यत्र प्रत्ययत्वं तत्र सविषयत्वमिति जिगरिष्यमाणव्याप्तिभिर्विप्रकर्षयितुमशक्यं प्रकरणसमोऽभिप्रयोगप्रदाने वैश्वानरवादिसमयः पराहत इति, 'यत्र दुःखेन सम्भिन्नादिपदार्थदलबोधितस्वपदास्पदत्वमपि गहनस्वापचीत्कारथूत्कारमात्रं स्यात्। 'एके विज्ञाते सर्वं विज्ञातम्' इतिनिगमशिरःपदार्थघटकसमयोजनायोजितप्रेक्षावन्नयनपथमवतरति। दृश्यदृशिधारणानुकूलमानसव्यापारमात्रेण नहि साध्यसिद्धिः, विष्टपं दृशि कल्पितमिति साधारणव्यवहारासाधारणमापकनिदानकलापभिन्नत्रयशुन्यासामान्यवान् पूरुषो विष्टपतले नाकपतिनापीदन्तयाभाष्यम्। यद्वक्तृधीविषयत्वं तत्सामन्यवत्त्वाभ्युपगम्य नित्यत्वादि 'सन्ति हि धर्मा' इति विसम्वादिप्रवृत्तिजनकतायां सुध्युपास्यं किं वृत्त्यात्मकमुत धीत्वात्मकं सूरिसम्प्रत्ययप्रतिपन्नविमतकालक्षेपः नाचक्षन्ते भावाः। अचिदात्मिकावृत्तिर्यदि धात्वर्थसन्निकर्षप्रत्ययस्याध्यक्षत्वमभ्युपगम्यते चेन्नसाम्प्रतं स्वान्तस्यापि धातुत्वाभ्युपगमात्। यद्यपि स्वान्तस्याधातुत्वं प्रत्यपादीतिकेनापि तन्न मनोरमतीर्थसमयः, पूर्वतनप्रमेयशेखराकरहेलनात्सकलप्रमेयधौरेयाभ्युपगतस्वान्तस्याधातुत्वं बलाद्वलयितुं प्रवृत्तः स्वबुद्धिकौशलसमर्चितार्चिदात्मकनिर्विषयस्य सविषयत्वमापादनधौरेयभट्टोजिदीक्षिताः वृत्तिमात्रं मीमांसन्ते। मीमांसितविचारप्रचयावसरे शाब्दीप्रमास्वरूपमुखरितवैखरिनिर्झरी न परां स्पृशति। आर्थी प्रमा चार्थगतप्रत्ययान्तनिरूपणानन्तरमयं घट इति प्रत्येति न तु पूर्वं तस्मात्परापश्यन्तीमध्यमावैखरीतिधारावाहिकवित्तिपरम्परापि विच्छिद्यते। अतो मूलाद्वयनिश्चयसमन्वयसमनन्तरं भेदनिर्मूलं स्यादिति न वाचोयुक्तिः साम्प्रतमतथागतमूलकव्यवसायकरणशूलमिव वाद्यन्तरवैभवोऽपिनिर्धूतः। निगमशिरःप्रामाण्यद्वयसाधनबाधनत्वे कृत्स्नप्रत्ययसामान्यप्रामाण्याप्रामाण्यापादने नाक्षमः, किञ्चनप्रमाण-

सामान्यमाश्रित्य प्रमाणविशेषमन्तरा सञ्चित्यमानसम्प्रत्ययवतां धुरीणा अपि न संग्रहसत्त्वा अपितु दुर्ग्रहाः एव, वृत्तिसामान्ये पराकलापश्यन्तीमध्यमानां वैखरीवृत्तिनिदानप्रामाण्यसामान्यसिद्धिसत्वमप्यसत्त्वमेव निश्चप्रचं, निश्चितस्य साध्यवतः पक्षस्यापह्नीकरणचतुरसनातनबौद्धानां वृद्धत्वमपह्नोयत, क्षयकर्मपटुतमकर्मिकौशलनयनकौशलायिते समभिव्याह्रियते । अविधाविषयीभूतसत्त्वस्यासत्वं कथमभिधित्सितं, कालितसंख्यावत्प्रवृत्तिजनकतावच्छेदकावच्छिन्नप्रत्ययस्य वृत्तिजनकतायां स्वरूपविरुद्धत्वमित्यभ्यधायि प्रत्यक्तत्वप्रदीपिकायां तन्न स्वरूपेणाभिहितान्वयं नाप्यन्विता भवानं तौतातिगुरुमतकर्मिणां कर्मकलापसम्वाहनव्याजेनापि वृत्तिरचित्त्वमेव ।

भूतसम्विद्भूतत्ववादः न सञ्जयः

भूतस्य हि सम्विदो भूतत्वमनाकलितस्वान्तप्रत्यय एवेति सावारणमर्त्यप्रत्ययीभूतस्यापि पुनर्भूतत्वं न वादसञ्जयः । कदाचिदितरव्यावर्तकधर्मावच्छिन्नस्य शेषत्वं शेमुषीशेषिणीवन्ध्यातनयनीलाम्बरसुमनसत्कृतशेखरपाणिपीडनसंस्कारावच्छिन्न इति कखविलासास्पदम् । वन्ध्यात्वतनयत्वयोर्विरोधाद्यदिस्वान्तगतत्रैकालिकतथ्यं विवरीतुं विविदिषाम इतिस्वपक्षस्थापनहीनघण्टापथेन शमनक्षयपथिकायन्ते । अध्यवसायात्मिकाधीवृत्तिरपिचिदधिष्ठानिकेति प्रकाशते कथं सङ्गच्छते व्युत्पत्तिवादविलासः । शक्यतावच्छेदकधर्मावच्छिन्नवृत्तिताकत्वस्याप्य-'वेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्व'स्वप्रकाशनिरुक्तिर्नानवद्या निरुक्तिसत्वे वस्तुसत्त्वमित्यन्वयसहचरव्याप्तिग्रीव्यवहारनिर्वचनपटुतमकिल्लाक्षणिकनिर्मलसरणिप्रामेयिकैः स्वायत्तीक्रियते, तदनभ्युपगम्यमाने 'पाटच्चरलुण्ठितवेश्मनि यामिकजागरणवृतान्त' इति हार्षिक प्रतिवचनं सञ्चारीक्रियताम् । प्रत्यक्तत्वमेव वैश्वानरसम्विदपरोक्षत्वं सम्प्रतिपन्नोपाधित्वं भूतमिति चेन्न प्रतियोग्यनुयोग्यन्यतराध्यासिकसन्निकर्षस्तु सुस्थिर एव। चिदनुयोगिके दृग्गोचरीभूतविष्टपप्रतियोगित्वमनाविलमेवाभावज्ञानात्प्रति प्रतियोगिज्ञाननिदानाभ्युपगमात् । तथा–

भ्युपगमः तथागतशुन्यसमयमेवायासेन जामातृकृतमित्यनास्थेयप्रगल्भालापः, नच प्रतियोगितावच्छेदकधर्माभावे धर्म्यभावः, नात्र घट इत्यत्रेदंत्वावच्छिन्नकालानुयोगिकघटत्वावच्छिन्नप्रतियोगिकभिन्नप्रत्ययोऽनुभवसिद्धचरः प्रतियोग्यनुयोगिभावविरहीकर्तुं विशेषणविशेष्यभावो वानपलपनीयः, किं धर्मोऽपि कालिकसन्निकर्षितदैशिकसम्बन्धावच्छिन्नो वेति न ज्योतिष्मत्याकाशे प्रातिभासिकव्यावहारिकविष्टपजातविकल्प एव। अभावस्याधिकरणात्मकतया द्वैताभावोपलब्धिकभिन्नसमयत्वात्। एकविज्ञातानुश्रवपदकदम्बमापकीभूतस्वसत्त्वसिद्धिरितिभिषजाम्वरदत्तागदेऽपि न शान्तो व्याधिः। करणगोचरीभूतपदकदम्बनिगलितार्थप्रकाशो न युक्तमः, तत्त्वमसीतिसमाम्नाततत्पदार्थसत्त्वासत्त्वव्यवस्थापनान्यूनानतिरिक्तधर्मिधर्मयोरन्वयसहचरसमन्वयपूर्वकं मानीकर्तुं युक्तं नापरा शुक्लसरणिः। अतः प्रकरणसमचोदितपदनिकरापाकरणचतुरविदग्धवरवैदग्ध्यन्न सञ्जयपक्षः। तत्पदचोदितत्वंपदस्यैकत्वार्थकासीतिपदप्रयोगा'दशब्दमस्पर्शमरूपमव्ययं' 'न सन्दृशे तिष्ठति रूपमस्ये'त्याद्यमापकपरिप्लुताव्ययानन्दसल्लक्षणविलक्षणमाकाशमिति भवान्तरभूतशब्दसत्त्वविवरणपरप्रामाण्यसामान्यानां स्थविरत्वं कदाचिदन्यतमत्वमुपचिक्षेप। सन्निरुक्तिनिर्वचनपटुतमगुरुप्रत्ययप्रकृतिसन्निकर्षावच्छिन्नवृत्तिकान्यत्व परिनिष्ठितत्वं, प्रतिवादिभयङ्करास्सत्त्वतत्त्वेतद्द्विष्ठत्वप्रतिकुक्षीकरणपराः न समीहन्ते प्रत्यवतिष्ठन्ते च परं भिन्नाभिन्नव्यवस्थापनप्रवृत्तोऽन्योन्याश्रयाणावतरङ्गावर्तविषयत्वान्नार्थसिद्धिः।

भिन्नं सम्प्रचक्षमाणकथाकौतुकाकलितचित्प्रतिपित्सवोऽभिन्नमकरन्दं स्वसमयानुगुण्यमाकर्ण्य पित्सन्तीति नाघटकघटपटमठभूखानिलानलजलपञ्चत्वाञ्चितविष्टपमधिष्ठानीकृत्याहमिति सम्प्रसादः रामप्रसादः, न तु स्वरूपं मिति भिन्नाभिन्नस्वत्वनिर्वचननिवृत्तिलक्षणः व्याचकौ। भिन्नेऽनुगमकत्वे सति शब्दप्रयोगत्वव्यवहारसत्त्वमभिन्ने

करणगोचरीभूतविष्टपार्थक्रियाकारित्वानुपपत्तिः। तथाभूते सति दुर्दान्तस्वान्तग्रहाशितासुरतत्वसत्त्वान्वेषणरतबुधकुलकैरवाणां समञ्चितप्रपञ्चेतरसमस्तवस्तुविलक्षणानन्दैकघनस्वविदभ्युपगमः, न स्वरूपप्रतिपादनपरत्वं सामस्त्येनाञ्चितसम्विदिभासमानत्वमपि सम्विदेव स्वरूपं तथा च प्रत्नसामन्तशिरोरत्नायमानवैखरीकौतुकेनाः चित्सत्त्वप्रतिपित्सुकामाः सकलपरसमयशकलनपुरन्दराश्चिद्विलासपक्षोकरणक्षमाः चित्रमिदनलीकम्। सत्यभ्युपगमवादसरणिशरणीकृत्य निर्गलिताभिन्नप्रतिपित्सुसौकर्यार्थमवोचाम इति तु कदर्थितपरिपन्थीभणितिः, सकलागमगूढार्थतात्पर्यविधारणकुशलसूरिवर्यवाचोयुक्तिः सन्न्यस्तैव। त्वंपदसमधिगम्यविलक्षणैकत्वबोधनपरा वाचस्पतिस्वरूपलक्षणप्रतिपादनपरा वाचस्पतिगिरस्त्वम्यभिप्रयान्तीति सबलबलाबलविचारणसाधारणप्रत्ययस्सञ्जुगुप्सितः। असीतिसमभिव्याहृततत्त्वमयोरैक्यप्रतिबोधनं तु न भावत्वं परं भूतसिद्धिरित्यभिधित्सितार्थबाधेऽञ्जसेति न संपथीनन्ति, सम्प्रत्ययभिन्नप्रमेययोरपि स्वानुभूतिसम्वृत्तिनिवृत्तिपरको वा प्रवृत्तिस्वरूपः, भृशं समभिव्याहृतशब्दस्वरूपसाम्यवैषम्यापादनं स्वरूपसिद्धमिति नभस्यधारासम्पातवत्कर्कशतर्कशतेनापि चित्त्वापादनमपाकृतमिति कृतं रभसवादेन, तथाचैदम्पर्यतात्पर्यविधारणप्रामाण्यविशेषतत्त्वमसीतिमहावाक्यस्य भिन्ने निगूढार्थतात्पर्यमिति न क्षमन्ते पराः। सामान्यविशेषानुश्रववचनद्विष्टत्वनिष्ठव्यवहारादगौणीगर्भलक्षणाश्रयणादेवैवयं नः सिद्धिरिति,नाभिन्ने ज्ञातृज्ञेयभावसम्विदुरीकृतपक्षः स्थैर्यः सन्निकृष्टस्य विप्रकृष्टीकरणं मूलावच्छिन्नम्। वित्तिसत्त्वविशेषप्रतिपादने वित्तिसामान्यसत्त्वान्यतरत्वं किन्नाभ्युपगन्तुमर्हम् ? अनर्हत्वे प्राप्तौ सत्यां प्रतिषेधपदकदम्बप्रयोगः प्रयोज्यानुयोज्यं, प्रसक्तपदनिकरणमन्यतरत्वापादनं भृशमसत्त्वसत्त्वीक्रियतेऽनर्गलतर्कमूलसरणीकरणीकरणादिति। नापि स्याद्वित्तिकथाक्षणदाक्षणाशाम्बरसमयवद्ब्रह्मसंगतत्वान्नापि गोगजवाहनबहुलप्रकारबलवत्तरमापकाभ्युपगच्छतां सात्वत-

बौद्धसमयानुगुण्यमितिविशिष्टाद्वैतशब्दव्याघातात् । परभिन्नकालीय-संसृतितूलामूलानुकृतित्वमेव दृशा मृगेलिमं प्रेक्षावद्भिः ।

भिन्नप्राथम्यत्वासंभवेऽभिन्नत्वासंभवः

भिन्नवैतथ्यसिद्धिपूर्वकत्वाभावात्कथमभिन्नसिद्धिरिति भिन्न-प्रयोगाधिकरणकालावच्छिन्नमिव सिद्धिर्नः कालात्ययापः । तथा चाकरे 'द्वैतमिथ्यात्वसिद्धिपूर्वकत्वाद्द्वैतसिद्धि' रित्यत्र द्वैतनिर्वचनपूर्वकत्वे सत्यद्वैतनिर्वचनमद्वैतसिद्धिकृतकत्वं प्रति भिन्नवैतथ्यसिद्धित्वा-वच्छिन्नं निदानीकृत्याद्वैतसिद्धित्वाभ्युपगमवाद इति न, किमवच्छेदेन-द्वैतसत्त्वमुच्यते द्वयोर्भावो द्विता, द्वितैव द्वैतं मिथ्यैव मिथ्यात्वं द्वैतस्य मिथ्यात्वं द्वैतमिथ्यात्वं, द्वैतमिथ्यात्वस्य सिद्धिः, द्वैतमिथ्यात्वसिद्धिः द्वैतमिथ्यात्वसिद्धिः पूर्वा यस्याः सा द्वैतमिथ्यात्वसिद्धिपूर्विका, तस्या भावः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वं तस्माद्द्वैतमिथ्यात्वसिद्धिपूर्व-कत्वाद्द्वैतसिद्धिरिति न, दृष्टचरद्वैतस्य कृतपूर्वनिर्वचनाद्बहुव्रीहि-समासघटितान्यपुरुषप्रधानार्थस्य न द्वित्वप्रतिषेधः द्वित्वधर्मावच्छिन्नस्य प्रथमभावित्वाभ्युपगमात् । द्वित्वधर्मावच्छिन्नभिन्नस्य पूर्वभावित्वान-भ्युपगमात्तत् पूर्वकत्वं छिन्नं, तत्पूर्वकत्वानङ्गीकारे द्वैतमिथ्यात्व-सिद्धिपूर्वकत्वव्याससमासघटिताद्वैतसिद्धिरसिद्धिः । द्वैतमिथ्यात्व-सिद्धिरद्वैतसिद्धिं प्रति कारणन्नियतपूर्ववृत्तिकारणनियमपूर्वकाद्वैत-सिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वसत्वात् । यत्राद्वैतसिद्धित्वं तत्र द्वैतमिथ्यात्वासिद्धिरितिव्याप्तिनियमाभ्युपगमात्, इति न सर्वत्र कृतकत्वनिदानगमकपदं स्वगम्यं गमयतीन्द्रजालिकरसालरसवद्विश्व-मायिकागम्यगोचरः न सद्भावसद्वृत्तिगोचरः । द्वैतवति ब्रह्मणि द्वैतं नास्तीत्यभावज्ञानं प्रति प्रतियोगिज्ञानस्य हेत्वर्थे भावितादैत-सिद्धिसत्वासत्वेऽपि न क्षतिः । तदुपलक्षितनिश्चयस्तद्विशिष्टनिश्चय-पूर्वकः, तथाचाद्वैताभावोपलक्षितब्रह्मनिश्चयः द्वैताभावविशिष्टब्रह्म-निश्चयपूर्वकः, द्वैताभावविशिष्टब्रह्मनिश्चयो द्वैतविशिष्टब्रह्मनिश्चय-

पूर्वकः तथाचाद्वैतसिद्धेः पूर्वं द्वैतवद्ब्रह्मणि द्वैताभावनिश्चयः तस्मात्पूर्वकत्वसिद्धिर्द्वैतनिष्ठप्रकारतानिरूपितद्वैताभाववद्ब्रह्मणि द्वैतं नास्तीति द्वैताभावोपलक्षिताद्वैतमिति ।

नन्वभावस्य ब्रह्मात्मकत्वोरीकारे 'यतो वेति' 'यथोर्णनाभिः' 'द्यावाभूमी जनयन् देव एकः' इत्याद्यानुश्रववचनमापकममापकं स्यादभावादर्शनस्पर्शनक्षमदृश्यासम्भवात् । अन्यथा तमसो भावत्वाभ्युपगमप्रतिकूलतर्कपराहतत्वात्प्रत्यक्तत्त्वप्रदीपिकानुमानमूलोच्छेदप्रसंगः।अज्ञानं भावरूपमभावरूपं वेति चोद्यप्रतिवचनकालेऽज्ञानस्य भावरूपत्वं तमोवदिति दृष्टान्तीकृत्यानुगतधर्मवत्त्वं स्थिरीकृतम् । अभावरूपाज्ञानात्प्रपञ्चासम्भवश्चेदभावस्वरूपब्रह्मणः कथमिदमावेद्यमानकृतकत्वप्रपञ्चसम्भवः, भावादेव सम्भवोऽभावादसम्भव इति तमस्सत्वमुपचिक्षेप, तमस्सत्त्वानभिलषितेऽनुमित्सायां दृष्टान्ताभावस्तदभावाद्विष्टपाभावः, प्रवञ्चनाशवलितप्रपञ्चाप्रकाशाभावात्मकतमसः कृतकत्वाभावोऽर्थक्रियाकारित्वमनपलपनीयम् । न च द्वीत नामरूपाभ्यां प्राप्त इति द्वीत, द्वीत एव द्वैतन्नविद्यते द्वैतं यस्मिन् तदद्वैतमिति, मासव्याससमासघटितसकलशब्दानामभिन्नत्वनिषेधपरत्वाच्छब्दगम्यगमकसमये भिन्नमवसीयते तेन नाभिन्नत्वविकृतिपरं प्रकृतित्वमेव शमादिषट्कतुर्यसाधनत्वावच्छिन्नप्राज्ञानुबन्धितमिति, न तु हितमितवास्तवपरिवचनं,हितमितत्वादीनामपि भिन्नकालसत्त्वान्मूकघूकसमयास्थेयम् । अतो भिन्नधर्मानुगतभिन्नतुच्छयोरैक्यमपि न सितपक्षः दुलक्षणकृतकृतकत्वमतथ्यापादनमयुक्तमेवेति, दुर्लक्षणकृत्यव्यवहाराध्यक्षमायायां काथिककुलतिलकपरच्छन्दानामीशनमात्रं स्यादलीकमिति शब्दापलापः न कृत्याध्यक्षविषयः । अनर्थनिवृत्तितात्पर्यवतामन्तसमय 'एकमेवाद्वितीयमि' त्याद्यभिन्नोपलक्षितब्रह्मविषयकनिश्चये ब्रह्मणि भिन्नाभावविशिष्टबुद्धेर्द्वारं, न चित्प्रतिपादने तात्पर्यं स्वप्रकाशतया नित्यभूतत्वात् । अनर्थशवलितभिन्नाभावविशिष्टचित्प्रतिपत्तिपूर्वकचैतन्य-

मात्रप्रतिपत्तौ तात्पर्यवति सत्यनर्थनिवृत्तिनिदानत्वात् प्राक्काला-वच्छेदेन ब्रह्मणि भिन्नाभावप्रकारकबोधस्ततः तादृशाभावोपलक्षित-ब्रह्मरूपधर्ममात्रबोधः। कुतश्चेदुपलक्ष्यधर्मिबुद्धावुपलक्षणीभूतधर्मविशिष्ट-बुद्धेर्द्वारित्वं भिन्नाभावाविशिष्टाभिन्ने युज्यत इत्यपि न हृद्गत-प्रत्ययः, तदुपलक्षितधर्मिबोधस्य तत्प्रकारकत्वनियमात्कथं धर्ममात्र-बोध इति विषये करटाद्युपलक्षितसदनबोधस्य करटाद्यप्रकारतयोक्त-नियमे मापकासत्त्वात्। स्वकाले भिन्नवति भिन्नवत्त्वकालावच्छेदेन भिन्नाभाववत्त्वविषयकत्वावच्छिन्नभिन्नः, 'सदेव सौम्य' 'तरति शोक-मात्मवित्' 'ज्ञात्वा देवमुच्यते' 'विद्वान्नामरूपाद्विमुक्त' एभिर्मापकैरेक-कालावच्छेदकावच्छिन्नप्रतियोग्यभावयोरेकाधिकरणवृत्तित्वधीरूप-— मिथ्यात्व निश्चयः स्वरूपसिद्धिः। सत्येवं 'नेह नानास्ति' 'नात्र काचन-भिदा' 'एकत्वमनुपश्यत' इत्याद्याम्नायमापकसामान्यानामध्यक्षान-ध्यक्षे तत्पदार्थशोधकवाक्यादीनवित्तिपूर्वकत्वादस्तित्वविशिष्टचिद्भिन्न-वस्तुसामान्याभावभिन्नकालावच्छिन्नभिन्नवच्चिन्निरूपिताधेयताश्रय इति प्रत्ययः, स प्रत्ययो वितथमवगाहते, ज्ञप्तिगताध्यक्षेऽपि 'स्वाकारवृत्त्यु-पहितप्रमातृचैतन्यसत्ताकत्वशून्यत्वेऽर्थगताध्यक्षो न तुल्यवित्तिवेद्यम्। अलीकार्थभासवत्पूर्वकत्वार्थभासाभ्युपगमः कांदिशिकविगतप्रत्यया-शान्तरप्रत्यायितत्वाद्विपश्चित्कुलमालायितेऽपि भिन्नवितथनिश्चय-प्राथम्यत्वं भूतम्, तदप्यसदितिचेन्न मातृधीत्वानवच्छिन्नस्वापका-लावच्छेदकमर्त्यप्रत्ययमापकममापकं स्यात्। भिन्नवितथनिश्चय-प्राथम्यकौतुकस्यापि 'वाचारम्भणत्वान्मृत्तिकेत्येव'तथ्यम् तदिष्टमभिन्न-कालाभ्युपगच्छतां न परिमितं पराहतम् कात्स्न्यैवैतथ्यापादयतां कृत्स्ने चित्प्रमातिरिक्तवाध्यत्व परमार्थे, परमार्थकालावच्छेदेनैकत्वसत्वं भिन्नत्वात्। तस्माच्चित्प्रमात्वसत्वसन्दोहरसाकलनाभिन्नप्रत्यये तत्प्राथ-म्यत्वपराकलिते न छिन्नं प्रतियोग्यनुयोगिभावोऽपि नान्यतरान्यतम-सांचिरसमूको न कौशिकः।

स्वापसत्त्ववैतथ्यम्

धात्वर्थविलक्षणस्वापप्रत्ययो यन्मानीकृत्य 'क्लेशकर्मविपाकाशयैरपरामृष्ट'सत्पुरुषकृतकृतत्ववैतथ्यं सम्प्रसादेनक्रियते तच्छेमुषीमुच्छेमुषीविशयविषयत्वाद्व्युदशनीयमेव । समनैय्यत्यफलाभिसन्धिपूर्वकत्वसमभावितत्वादितरपक्षतुल्यीकरणे स्वापदृष्टान्तः क्वचित्प्रतियोगितावच्छेदकधर्मानुसारेण सम्भवः, स्वापकालावच्छिन्नकम्बुग्रीवादिमान्व्यक्तिमाया, जाग्रत्कालिककम्बुग्रीवादिमान्व्यक्तिमायापूर्वकत्वान्नहीन्द्रियार्थोपलब्धिकालिकस्वरूपप्रत्ययानवगमेऽपि स्वापे तदर्थस्वरूपप्रत्ययस्स्यादिति वैखरिभ्रीकरणानर्गलम् । पूर्वसिद्धधात्वर्थसन्निकर्षमायाविरहे कष्को गीष्पति'रुपादानगोचरचिकीर्षाकृतिमत्त्व'स्य कृतकत्वं विपर्ययत्वमिति ब्रूयात् । प्रथमनिश्चिततद्गतभूयोधर्मवत्त्वस्यानियामकप्रत्ययगोचरत्वात्स्वाभाववति कलने समं समञ्जसत्वात् । सत्त्वासत्त्वीक्रियते नासत्त्वस्य त्रैकालिकनिषेधस्य प्राक्कालावच्छेदेन प्रतियोगित्वं वाच्यमन्यथात्रित्वनिषेधत्वं स्यादिति न, देशिकाभ्यासाश्रम्यकृतनिगमागमतीर्थकौतुकसर्वङ्कषवादविप्लवत्वाद्धितायां दृश्यमदृश्यं स्यात् । 'बालाग्रशतभाग' भाजितसम्प्रसादप्रसादीभूतस्थिरदृश्यं कथं हितायामनुगतेति, सकलधातुविकलेऽपि तत्तद्गतविलक्षणस्वापवित्तिः व्यावहारिकविष्टपवित्तिपारमार्थिकवित्तिच्छित्तिमृतिरिति प्रमेयकालवालीक्रियत इति कालाक्षेपः अवाच्यकुलधर्मः स्वापसत्त्वनिर्वचनपराणामिदमवक्तनीयं, हितानुगतप्रपञ्चस्य तत्पूर्वकत्वसत्त्वदृढतरसंस्कारविरहात्स्वापसत्त्वाभावात्कथं स्वापनिगमनीक्रियते । स्वापो भावाभावो वाभावे निगमनाभावस्तमोवत्, तथा च दृश्यवैतथ्यापादनं विरहात्कुतः, सप्रधानस्वापसत्त्वोरीकरणमन्तरा हिताभासितविष्टपव्यतिरेकोऽप्रधाने च प्राथम्यसत्त्वविरहात्स्वापसत्त्वं गलितम् । असत्त्वाभिधित्सितश्चैत्तन्न विश्वच्छन्दानुवर्तनं वात्वर्थसन्निकर्षविरहसत्त्वेऽपि रेतस्खलनानन्दानुभवः परावरयितुमशक्यमिति,

षोडशकलापूर्णानन्दनक्तशय्यानुभवमूत्रस्रवणावितथवितथीभावनम्—भिन्नव्यसनम्। धात्वर्थोपलब्धिकालावच्छेदकावच्छिन्नाध्यक्षकाकोदरमायासूतकालावच्छिन्नेऽपि प्रतीतिमात्रशरीरकाकोदरभिया विव्यथे, सत्त्वानवच्छिन्नप्रतीतिमात्रशरीरेण न व्यथते पूर्णानन्दः, पूर्ण एव तर्हि कथमपसरणालोकादिक्रियाकलापापलापयितुमीष्टे वादिभीकरः, मापकशतविवरणकालबलीकरणभावेन न स्वापानृत्यं भूतीकर्तुञ्छक्यते। नानुभूतभव्यमनुभाव्यविषयः, स्वापकालावच्छेदेनानुभूतसम्प्रसादानुभवितथनमयुक्तं परिपन्थिशताक्रान्तभीकुर्वञ्जायते सम्प्रसादे स्मेरास्यमण्डलविरहः सत्त्वप्रसञ्जितस्वापनव्यभव्यवित्तिनिवर्त्य भव्यमिति गगनकखनविषयः वितथमलीकं वा स्वापसंसृतिपूर्वकत्वन्नाभानापादासत्वापादवित्तिनिवर्त्यद्वयविलक्षणभव्यदर्शनादन्तिमखसुमनचित्रितषण्ढतनयो गमर्थानुकूलव्यापारवानिति चित्रा स्वापमाया, प्रथमकालावच्छिन्नानुभवानवच्छिन्नप्राज्ञः स्वशिरच्छेदनस्वापार्थक्रियाकारित्वसत्त्वव्यतिरेकयितुमशक्यम्। एवं युक्तिसृत्यनुश्रित्य वैश्वानरवापमापकसृत्यनुपथिकायमानेऽपि स्वापानृत्यन्न फलगमकमिति हा हन्त, अन्तःकरणावच्छिन्नसाक्षिचैतन्यनिष्ठस्यासत्त्वस्य मापकवित्तिमात्रनिवर्त्यमर्थावच्छिन्नब्रह्मचैतन्यनिष्ठस्याभानस्याध्यक्षवित्तिनिवर्त्यत्वाच्चागममापकस्वापसत्त्वाचलीकरणधात्वर्थविकाराध्यक्षत्वाच्च लौकिकाध्यवसायो नानवद्यसितव्यः। स्वापललनादर्शनकार्यसिद्धिवचनमभाषि तदनृतमिति न साम्प्रतं, स्वापतथ्यपथ्यकरणन्तु परमपथ्ये तात्पर्यानिर्णयविजयोऽपि स्वापकथामानमुरीकृत्योन्मत्तकल्पप्रलापः न तु तत्त्वमुक्ताकलापः। धात्वर्थोपलब्धिकालावच्छिन्नभिन्नानवच्छिन्नाभिन्नत्वस्थिरीभूतेऽसत्त्वाभानयोः कृत्यमुत विलक्षणसंसृतिसृतिः, आगमप्रामाण्यस्यानित्यत्वमभ्युपगच्छताऽऽगमस्याप्रामाण्य ध्रुवम्। स्वापविप्रपरसवतीसूताध्यक्षवन्नाध्यक्षः योग्यतानुपलब्धिसूनपूतमापकव्यतिरेकाध्यक्षविरहे नानुमित्सा, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वसादृश्यमापकस्य कथावशेषः,

आर्थिकमापकावधूतस्वापप्रत्ययश्चेत्तन्मन्दः 'पीनोऽयं सम्प्रसादः दिवा नास्यचपलीकृतः' इतिपदकदम्बे नक्तास्यमधुरव्यापारशुन्यत्वे सम्प्रसाद-प्रसादपीनत्वामापकत्वान्नक्तास्यव्यापारवान्सम्प्रसादः रसपाकपूर्ण-पीनत्वादित्यनविलबोधः। अनलब्धस्त्वध्यक्षागोचरप्रत्ययधात्वर्थसन्नि-कर्षशुन्येऽ'पीह बटे यक्ष' इति सम्विदवगमः, वलवत्तरमापकशतव्यति-रेकेऽपि सत्त्वमनलब्धस्येति, तत्स्वापसञ्चारदुरवस्थितिर्वटाध्यक्षे यक्षाध्यक्षः कुतो नेति दुरपह्नवप्रलापापरोक्षे समितस्वापसंसृतिसाधनेऽ-मापकत्वात्। अध्यक्षानुमित्सार्थिकसादृश्यानलब्धानां परोक्षापरोक्ष-तत्साधनवाधनप्रमापकविप्रकृष्टायितं, तुर्यपूर्णशब्दप्रमापकच्छाब्दी-प्रमायां सम्प्रसादस्वापविश्वं पर्यवस्यतीति विश्वसत्त्वावगमस्यागमत्वा-त्तदपायित्वं स्थानेऽपायित्वसत्त्वव्यवस्थितिमत्त्वस्य किं मापकेनेतिहच-सांभवादिनामपि कृतमिति। तर्हि सर्वमापकनिरर्गलत्वापादनपर-व्यसनगरलागदपरिमितमास्थेयमिति चेद्वाचकागमापायित्वस्य वाच्याव्ययकूटसमनागदत्वात्स्वापविमतसाध्यतृतीयान्तनिगमनच्छब्द-व्यवहारदुर्व्यसनत्वात्। तृतीयान्तनिगमनव्यापारसूतप्राच्यत्वसिद्धत्वेऽ-परोक्षमायाविषयाध्यवसायस्तत्करणसूतपूर्वक एव, न तु पश्चिम-भावितसञ्चिकीर्ष्यमाणसाध्यवत्त्वकालावच्छेदेन, साध्याध्यव-सायितव्यमनूनीभूतेन मापकेन प्रयोगाधिकरणकाले त्रिकालाबाध्य-भिन्नाभावोपलक्षितत्वे स्वापवंतथ्ययोर्न साम्यं, कुतो हि वितथानला-भिन्नमदनभसितीकरणे प्रवृत्तः, यत्कालावच्छेदेन नायनपथविषयी-भूतं तत्कालावच्छिन्नार्थाः जाग्रति नेति न प्रथमदत्तप्रतिवचनत्वात। स्वापे हाटकघटितरुचकचाकचिक्याध्यक्षसमनन्तरसमुद्बोधे जाग्रत्यपि कनकरुचकं स्वापरुचकवदन्यथयितुं कोऽभिन्ननारदः प्रभवेज्जाग्रति भवति स्वापेयग्रैवेयरुचकवदावदत्वन्न, व्युत्पत्तिव्युत्पित्सुसूतन्याय-सिद्धाज्ञनच्छकलनव्यसनदुरुत्तरत्वान्न, धात्वर्थघटितकात्स्न्यमातृकानु-पातित्वाद्घाटकातिरिक्तविपर्ययागमाभ्युपगमाच्च पञ्चत्वावच्छिन्ने भ्रमच्छवलितभिन्ने नास्थीयते। चिदधिष्ठानसत्ताव्यतिरेक साध्यसत्ता-

व्यतिरेकत्वाद्घाटके स्वापेयरुचकविकल्पः सम्प्रसादप्रसादविषयः, 'अनिरूप्यमाणत्वे सति लक्षणशून्यत्व'मिति दुर्लक्षणप्रवञ्चनप्रपञ्चितस्त्वापविष्टपस्फुरणाभिवदने चिदधिष्ठानव्युत्पित्सूनां सद्धर्मभिर्नानुमित्सन्ते प्रतिपित्सामिति । 'एषः देवः स्वप्नान्पश्यति स्वप्ने महिमानमनुभवति यद्दृष्टं तत्पश्यति'स्वप्नान्नपश्यतीति,दृष्टं पश्यति नपश्यति, महिमानमनुभवति' विप्रलम्भविरोधाभासोदाषंदरेखायितं तन्न वितथं जामिकाविरहत्वे सत्यावितथ्यायितत्वात् । स्वप्नस्थानान्तप्राज्ञस्यावितथ्यंवंतथ्यं वा किं हृद्यमिति 'य एव स्वप्ने महीयमानश्चरति' इत्याद्यनुश्रवान्तमापकशतसमर्थितस्वापतथ्यवैतथ्यापादनपरिदेवना न प्रामाण्यस्वतस्त्व परावरमापकशतसंकुलेऽपि शब्दमात्रवृत्तित्वाद्विनिगमनपरमापककल्पविकल्पे च 'स्त्रियं स्वप्नेषु पश्यति समृद्धि तत्र जानीयात्'निगमान्तप्रमाणाप्रामाण्यं,वलाधानरूपाभिमतफलप्रदातृत्वं लावण्यस्मेरास्यमण्डलविग्रहविरहेऽपि तत्र नक्तकान्तासन्निकर्षगमत्वं नान्यथाविषयः । विश्वानि वेदांसि तुल्यानीति प्रमेयपारसारवतां व्याहरणमागमान्तवतामपरिच्छिन्नानामयं तुर्यपादे विश्वचैत्यानां समागमेऽपि कान्तादर्शनसमृद्धिदैवज्ञकल्पागमान्यथयितुमशक्यत्वात् त्रित्वव्यासज्यवृत्तिधर्माविच्छिन्नकालेऽपि न स्वापवैतथ्यमिति । इन्द्रियार्थोपलब्धिकालत्वेन स्वापाभावः घटत्वेन पटाभाववदिति न प्रमातृत्वावच्छिन्नचैतन्यस्य नेदीयसितमत्वात्प्रमाणत्वावच्छिन्नशब्दमात्रवृत्तित्वावच्छिन्नचैतन्येन प्रमेयत्वावच्छेदकावच्छिन्नचैतन्यं साध्यगर्भितमिति प्रमेयवादिवदनार्थक्रियाकारित्वमेव न प्रमेयसत्त्वासत्त्वपरिच्छिन्नापरिच्छिन्नयोर्निषेधात् । एकसत्त्वव्याजीकृत्य सत्त्वव्यवस्थापनपरशब्दोऽपि भूयस्त्वार्थप्रतिपादकः नैकविधपरत्वं,किञ्चस्वापानुभूतप्रभूतकान्तादिसन्निकर्षविप्रकर्षसम्वित्तथ्यातथ्यं वा—त्रिकालातथ्यपथ्यमिति न वैतथ्यं परं भूतभिन्नत्वावच्छिन्नंत्रिकालापथ्यानुभूतप्रयोगाधिकरणकालावच्छिन्नेऽपि सत्त्वात्कष्कः प्रकाशः ? न निजानन्दप्रकाशस्तर्हि प्रयोगाधिकरणकालावच्छिन्नार्थप्रकाशकसद्धेतूकृत्य

निर्वचनीयश्चेद्वृत्तिरित्यपि न स्वयञ्चित्त्वधर्मानवच्छिन्ना तदवच्छेदकावच्छिन्ना वृत्तिः स्वापेयार्थप्रकाशनपरेति परच्छन्दानां सम्मर्दनं न तत्त्वं, समे स्वापेयगोचरार्थानर्थावच्छिन्नाः नानर्थधर्मावच्छिन्नाः स्वतःस्फुरणक्षमाः तद्गोचरवृत्तिकावरणापगमे च सम्भान्तीति समर्थक्रियाकारित्वे घटपटादयोऽचित्त्वधर्मावच्छेदकावच्छिन्ना स्वगोचरवृत्त्यैवावभासन्ते, परं सर्वार्थप्रकाशनपरावृत्तिरपि न स्वतो भात्वावच्छेदकधर्मावच्छिन्ना तद्गतावरणनिवर्तकप्रख्यानमुरीकर्तव्यं, तदर्थं वृत्त्यन्तरानुसरणानवस्थानपर्यवसानमनभ्युपगमे भानविरहस्तथा च द्वित्वावच्छेदकधर्मावच्छिन्नपाशिपाशः ग्रैवेयचामीकरत्वादिति न चित्त्वातिरिक्तविश्वमचित्त्वं तथाप्यव्यक्तानुभूयमानवृत्तिवैलक्षण्यं स्वभावविशेषादिकं वा स्थेयमिति, यथा कम्बुग्रीवादिमद्दीपकावपि जडत्वधर्मावच्छिन्नौ तथापि तद्व्यक्तिभान आलोकनायनसन्निकर्षधर्मघटितमेवार्नालदीपिका तद्व्यक्ति प्रकाशयत्स्वात्मानमपि प्रख्यापयतीति स्वसमज्यानुमोदितलेशविषयो मानार्थावच्छिन्नचैतन्ययोरभिन्नत्वं, चिदुपरागावरणपराकरणं वाभ्युपगतार्थिकवादे सर्वसत्त्वानिर्वचनीयत्वादर्थे पर्यवसानात्। तस्मादभिन्नव्युत्पत्तिवाद भट्टोजिदीक्षितानां न सिद्धित्रैतथ्यमित्यनवचनस्थैर्थम्।

इति श्रीस्वामिप्रपन्नाचार्यविरचितं सिद्धित्रैतथ्यं समाप्तम्।

———